# द्वितीयोऽध्यायः

## वैदिकलोकतन्त्रम्

शास्-धातौ ल्युट्-प्रत्ययसंयोगेन शासनमिति पदं निष्पद्यते। तत्र 'शास्-ल्युट्'इति स्थाने शास् यु इति स्थिते युवोरनाकौ[१]इत्यनेन सूत्रेण अनादेशे शासनमिति पदं साधितम्। शब्दकल्पद्रुमे अस्य शब्दस्यार्थ: 'निकृष्टस्य हितसाधनादौ' 'राजदत्तभूमौ'इति चोल्लेखितम्।[२] शासनशब्द: संरक्षणार्थे परिपालनार्थे च प्रयुक्तो भवति। धातुरत्नाकरेऽपि शासनार्थे प्रयुक्ता: विविधा: धातव: समुपदृष्टा:। अमरकोशेऽपि कर्मज्ञापनसूचकेषुषट्पदेषु शासनशब्दस्योल्लेख: समुपलब्ध:।[३]'शासनं राजदत्तोर्वा'[४] इति पदेनापि संरक्षणार्थे परिपालनार्थे व्याख्यात: शासनशब्द:। किन्तु अथशब्दानुशासनमथधर्मानुशासनम्-प्रभृतिवाक्येषु प्रयुक्तम् अनुशासनपदं एकं विशिष्टशास्त्रस्य द्योतकं विद्यते। शुक्लयजुर्वेदस्य विश्वधाया:[५] इति पदस्य व्याख्यायां महीधर: धारणपोषणार्थक: 'डुधाञ्'धातोरवस्थिति: व्याख्यायति।[६] तत्र तेन विश्वधायापदेन विश्वस्य पालनपोषणमिति अर्थ: व्याख्यायते।

वैदिकजनानां धारणानुसारं समग्रविश्वं स्वपरिवारं मत्वा सर्वेषां सामग्रिकोन्नतेर्निमित्तं कृतं प्रार्थनादिकं तु यत्र तत्र सर्वत्र समुपलभ्यत एव। तत्कालीनमानवसमाज: सामूहिककल्याणनिमित्तं प्रगतेर्निमित्तं वा जागृत:परिलक्ष्यते।[७] परन्तु तत् सामूहिककल्याणे अनेकानेकानां घातकतत्त्वानां आविर्भावस्य प्रमाणस्वरूपं तथ्यं समुपलभ्यते।[८] वैदिकी वर्णव्यवस्थापि ऐक्यताया: घातकतत्वरूपेणैव परिलक्ष्यते। एकस्य मानवसमाजस्य कर्मानुसारेण तेषामार्थिकावस्थां वा परिलक्ष्य समाजे वर्णविभाजनं दृग्गोचरीभवति। एकस्य मानवसमाजस्य ब्राह्मण-क्षत्रिय-वैश्य-शूद्रत्वेन कृतं वर्णविभाजनं[९] तु सामग्रिक-ऐक्यताया: घातकतत्वम्। परन्तु वस्तुत: तेषां चतुर्वर्णानां विभाजनेन तत्कालीनसमाजे काऽपि वैविध्यता न परिलक्षिता। वस्तुत: अनेन विभाजनेन समाज: इतोऽपिसुपरिकल्पित: सुसृङ्खलितश्च अभवत्। तेषां चतुर्णां वर्णानां साम्यभाव एव सामग्रिकैक्यताया: सम्बलस्वरूप:।[१०]

वैदिक शासनव्यवस्थप्रशासनव्यवस्था वा तस्य प्रकृतिं मुख्यनीतिं वा अधिकृत्य विविधा:प्रकारका:परिलक्ष्यन्ते। वैदिकराजनीतौ साम्राज्य-स्वराज्यादि विविधप्रकारकाणां

प्रशासनानां सम्पूर्णप्रकाश: विकासश्च वैदिकसाहित्ये परिलक्षितमस्माभि:। किन्तु पाश्चात्यै: राजनैतिकविद्वद्भि: प्रतिपादितानां शासनप्रकारकाणामपि अवस्थानं (आदर्शानामवस्थानम्) सूक्ष्मरुपेण वैदिकसंहितासु समुपलभ्यते। यथा एकनायकतन्त्रस्य राजतन्त्रस्य वा वर्णनं प्राप्यते तत्रैव लोकतन्त्रं, संसदीयव्यवस्था, राष्ट्रपतीयतन्त्रं, युक्तराष्ट्रियतन्त्रं केन्द्रशासिततन्त्रं च वीजरूपेण वर्णितमस्ति। इत्यत्राधुना सर्वेषां प्रकारकाणां प्रशासनव्यवस्थानां विस्तारपूर्वकमालोचनाप्रस्तूयते -

**राजतन्त्रम्**

'राजतन्त्रम्' इति व्यवस्था वैदिकसाहित्येषु संप्राप्तेषु शासनव्यवस्थासु बाहुल्येन प्रशंसिता शासनव्यवस्था वर्तते। कस्यापि एकस्य पुरुषस्योपरि शासनभारं न्यस्यति चेत् तदेव तन्त्रं व्यवस्था वा राजतन्त्रमित्युच्यते। राजतन्त्रं नृपतन्त्रं वा एकनायकतन्त्रत्वेनापि परिज्ञायते। राजतन्त्रे नीतिग्रहणे दण्डविधाने शासनकार्ये च एकस्य पुरुषविशेषस्य निर्णय: सर्वजनसमादृतो भवति स एव सर्वशक्तिसम्पन्नत्वेन ईश्वरत्वेन च पूजनीयो भवति। स: पुरुषविशेष: राजा इति पदेन अभिधीयते। वैदिकसाहित्येषु इन्द्र-वरुण-सोम-क्षत्रिय-राजन्-राज्याधिपति-युवराज-राजकृत-राजन्यादिशब्दा: प्रसंगानुसारेण शासनकार्ये शासकस्य पर्यायवाचिशब्दत्वेन राजतन्त्रस्यास्तित्वे प्रमाणस्वरूपेण लभ्यन्ते। राजतन्त्रमिति शब्दे प्रयुक्तं 'राज'इति पदं प्रजारञ्जनार्थे प्रयुक्तो भवति। राजन्(पु) राज्+कानिन्=राजा। रञ्जयति रञ्ज्+कानिन् इति। य: प्रजानां (जनानां वा) रंजनं यथायोग्यमन्नवस्त्रावासादिभि: सन्तुष्टिं प्रदास्यति, स एव राजा इति संज्ञा।[११]

अस्य राजतन्त्रस्योत्पत्तिविषये वैदिकसाहित्ये विविधानि आख्यानोपाख्यानानि तथ्यानि च उपलब्धानि। कुत्रचित् वैदिकदेवतासु सर्वशक्तिसम्पन्नत्त्वात् श्रेष्ठत्वात् यशस्वित्वाच्च इन्द्र देवतानां अधिपतित्वेन वर्णित:[१२]।

अन्यत्रकुत्रचिद्राजाविहीनमेवाराजकतायाः कारणं मत्वा ईश्वरः राज्ञः सृजनमकरोदिति प्रोच्यते।[१३] ऐतरेयब्राह्मणे अन्यमाख्यानमेकं च श्रूयते- देवासुरसंग्रामे द्वयोर्मध्ये जयपराजयनिर्णेतुं असमर्थत्वात् देवादयः एकत्रिभूय आलोचनां चक्रुः। तदा राज्ञविहीनत्वमेव तेषां हीनतायाः कारणमिति ज्ञात्वा सोमं स्वस्य नेतारं निर्माय असुरान् पराजयमकुर्वन्निति।[१४]

एतानां त्रयाणामाख्यानानां सम्यक् विचारणेन राज्ञउत्पत्तेः त्रिविधसिद्धान्तस्य परिकल्पनं संप्राप्यते-

**१.ईश्वरीय व्यवस्थानुसारं राज्ञः उत्पत्तिः|**

**२.मात्स्यन्यायेन निमज्जितानां जनानां समुद्धारः।**

**३.योग्यतमस्य व्यक्तिविशेषस्य नियुक्तिः इति।**

1. **ईश्वरीयव्यवस्थानुसारं राज्ञः उत्पत्तिः-** राज्यव्यवस्थायाः समुल्लेखं कुर्वताथर्वेण प्रोक्तम् - शकधूमं (स्वशक्त्या शत्रून् कम्पयितुं समर्थः अस्ति यः तम्) नक्षत्राणि (क्षत्रविहीनाः प्रजाः) राजानमकुर्वत। तदनन्तरं परमात्मना राजानं प्रति भद्रं शुभाषिशं वा प्रयच्छदिति।[१५] कुत्रचित्पुनः एकाधिकसूर्याणां तेजपून्जं राज्ञि प्रतिष्ठितस्योद्धरणं संप्राप्यते।[१६] यत्र सः दैवीशक्त्याः प्रभावात् अधिकोन्नतिं प्राप्नोतीति।[१७] शुक्लयजुस्संहितायां राज्याभिषेकसमये जननेतारमुद्दिश्य प्रेरण-वाक्-ज्ञान-ओजस्विता-तेजस्विता-सौम्यता-व्यापकतादि दैवीगुणानामवस्थितिर्भवेदिति समुल्लिख्य सः ब्रह्म-सविता-वरूण-इन्द्र-रुद्ररुपेणोपस्थापितः।[१८] जननेतां द्युलोकात् समागतेन देवेन प्रेरितः पुरूषरूपेण चोपस्थाप्यते।[१९] कुत्रचित् तस्य नेतुः अग्नि-इन्द्र-सोम-मित्र-वरुण-यम-सूर्यादिदेवानां दैवीगुणानां अंशधारणस्य प्रमाणमुपलभ्यते।[२०]

2. **मात्स्यन्यायेन निमज्जितानां जनानां समुद्धारः** -राज्यतन्त्रस्य निर्माणमेव

अत्याचारनिमज्जितान् हाहाकारत्वं प्राप्तवत: मात्स्यन्यायेन रोदनरतान् जनान् समुद्धृत्य राजा प्रजारञ्जनं कुर्यादिति धारणयैव राज्ञ: निर्वाचनं राज्यस्य प्रतिष्ठापनं च विहितम्। प्रजानां रञ्जनात् स: पुरूषविशेष: राजा इतिपदवाच्य:।[२१] परराष्ट्राक्रमणेभ्य: प्रजासंरक्षणं राजन्यानां परमं कर्तव्यम्।

3. **योग्यतमस्य व्यक्तिविशेषस्य नियुक्ति: -** संहितासु शासनकार्ये योग्यतमस्य व्यक्तिविशेषस्य एव नियुक्तेर्विधानं परिलक्ष्यते। ऋक्संहितायां[२२] धनधान्यसम्पन्नस्यवैभवशालिन: युद्धादिषुपारंगतस्य वाप्रजावर्गस्य स्तुतिश्रवणयोग्यपुरूषविशेष: एव राजा भवितुं शक्नोतीति सूचितम्। पुनश्च प्रजावर्गस्य प्रगतेर्निमित्तमुन्नतेर्निमित्तं वा कार्यं कर्तुं समर्थ: दण्डज्ञपुरूषविशेष: एव जननेता भवितुं शक्नोतीति वैदिकनीति:।[२३] जनकल्याणमेव एकस्य क्षत्रस्य क्षत्रत्वम्।[२४] स: क्षत्रियएव[२५] राजपदनिमित्तमिन्द्ररूपेण नियुक्तोभवतीति श्रुति:।[२६] योग्यजनस्य नियुक्तेर्विषये विविधमतमित्यत्र अस्माभि: प्रस्तूतम्-

क. सामरिकशक्तेरधिकारित्वेन जनसंरक्षणम्-यतोऽहि वैदिकसमाजे वर्तमानवत् जनबाहुल्यता नैव परिलक्ष्यते। तदा वर्तमानादधिकपरिमितानामारण्यानां[२७]अवस्थितिरासीत्। जना: अरण्यानां मध्ये मध्ये गोचरणभूमिं[२८] परिलक्ष्य आवासं निर्माय[२९] ग्रामस्योत्पत्तिं चक्रु:। अरण्यस्थात् हिंसकजीवात्[३०] संरक्षणार्थं ते परस्परं सहयोगमाध्यमेन स्वजीवनं सरलमकुर्वन्निति। हिंसकजीवात् वाह्यिक-आपदी वा सुरक्षाप्रदानक्षेत्रे योवा येपुरुषविशेषा: प्रमुखा: आसन् ते एव परवर्तीसमये ग्रामप्रमुख-ग्रामनायक-जननायकरूपेण च परिचयं प्राप्नुवन्ति। तेषु जननायकेष्वपि सर्वशक्तिमन्तं पुरुषं शासकत्वेन स्वीकुर्वन्ति वैदिकजना:।

ख. श्रेष्ठानां योग्यसम्माननम्-राजान: वैदिकजनसाधारणेषु ज्ञानिनं शक्तिशालिपुरुषञ्च

श्रेष्ठत्वप्रदानं कुर्वन्ति स्म। अत: वैदिकसाहित्येषु "विचर्षणि"[३१]"विपश्चित"[३२]"सहिष्ठ"[३३]"वलिष्ठ"[३४]"ओजिष्ठ"[३५]इत्यादि पदानां वर्णनं संप्राप्तम्। तेषु य: शैक्षिक-शारिरिक-मानसिक-आर्थिक-पारिवारिकदिक्षु उन्नततरं श्रेष्ठतरं वा विद्यते स एव तेषां नायक: पथप्रदर्शकश्च भवति स्म।

ग.नेतृत्वम्-यतोहि नेतृत्वप्रदानमेव राज्ञ: मुख्यं कर्तव्यंविद्यते अत: अत्र स्वीकृतेषु सिद्धान्तेषु नेतृत्वस्य सिद्धान्तं सर्वप्रामाणिकं वर्तते। प्रजानां सुरक्षाप्रदानं, तेषां प्रगतेर्विषये चिन्तनं राज्ञ: परमं कर्तव्यमस्ति। तत्कर्तव्यस्य कारणेनैव स: जननेता भविष्यतीति। अत: राजानं प्रति "सत्तम:"[३६]"चर्षणि धृतश्चेति"[३७] शब्दादीनां प्रयोग: परिदृश्यते।

**राजतन्त्रस्य वैशिष्ट्यम्-**

१. कार्यपालिका न्यायपालिका-वैधानिकव्यवस्थाया: च नायक: एक एव भवति। स एव राजा स्यात्।

२. वैदिकसंहिताग्रन्थेषु सर्वत्र राज्ञ: निर्वाचनं दृश्यते तथा निर्वाचितेन राज्ञा राजतन्त्रं निश्चितम्।[३८] परन्तु कुत्रचित् ब्राह्मणग्रन्थेषु प्रथमनिर्वाचितस्य राज्ञोऽनन्तरम् आनुवंशिकराजतन्त्रमपि वर्णितम्।[३९]

३. एकस्य शासकस्य शासनकालस्य सीमावद्धता नैव परिलक्ष्यते।

४. संविधानस्थाने धीराणां ज्ञानिनां मन्त्रणा मुख्यत्वेन दृश्यते।

५. वैदिकराजतन्त्रव्यवस्था विधिमूलकं धर्ममूलकं चासीत्।

६. जनसाधारणानां धर्माचरणपुरस्सरम् एव स्वातन्त्र्यमत्र चित्रितम्।

## वैदिकराजतन्त्रस्य स्वरूपम्

वैदिकवाङ्मये राजतन्त्रस्य विशेषोन्नति: परिलक्ष्यते। संहितासु राजा इति पदस्य शताधिकानां प्रतिशब्दानां प्रयोगश्च परिलक्ष्यते। बहुषु स्थलेषु वैदिकदेवतानां राजा इति सम्बोधनविशेषाणि च प्राप्यन्ते। वस्तुत: राजतन्त्रे राजा एव समग्रराजनैतिकशक्तेराधारत्वेन परिगण्यते। स एव क्षात्रतेजस: अधिपतिर्भवति। क्षत्रस्तु राजनैतिकतत्त्वानां प्रतिपादक:।[४०] अत: एतादृश: राजनैतिकतत्वस्य प्रतिपादकत्वात् राजा क्षत्रियसंज्ञासूचक:। केवलं क्षत्रियवंशजाय एव शासनाधिकारप्रदानस्य व्यवस्था सर्वथा अशुद्धा परिदृश्यते। यतोहि संहितासु शूद्राणां तृत्सुजनानां वा अधिपति सुदासं[४१] राजत्वेनोपस्थापनमस्माभि: परिदृष्टम्। कुत्रचित् पुन: वैदिकदेवतानां राजत्वेन सम्बोधनं च प्रत्यक्षीक्रियते। वैदिकदेवतानां वर्णनावसरे राजशब्दस्य प्रयोगेन एतदेव प्रमाणीक्रियते यत् शासका: दैवीगुणानामधिकारिण: आसन्निति:। जननेतार: तदुल्लेखितानां दिव्यगुणानां धारणेन स्वस्य स्वस्य शासनक्षेत्रस्य अधिपतयो भवन्ति स्म। तन्निमित्तं सत्य-ऋत-दीक्षा-तप-ब्रह्म-यज्ञादीनां कठोरनियमानामभ्यास: कर्तव्य:।[४२] सद् धर्माचरणेन पूर्वोक्तगुणानामात्मसात्करणं राज्ञ: परमं कर्तव्यम्। संहितासु सौमाप[४३]-सुदास[४४]-पुरुकुत्स[४५]-दैवरात[४६]-दिवोदासादिप्रभृतय:[४७]जननेतार: पूर्वोक्तदैवीगुणसम्पन्नत्वात् राजरूपेण प्रसिद्धिमवापु:।

## राज्ञ: योग्यायोग्यत्वस्य निरूपणम्

यद्यपि राजतन्त्रम् आनुवंशिकशासनविधिर्विद्यते। तथापि तत्र योग्यायोग्यत्वनिरूपणस्य परम्परा: प्रत्यक्षीक्रियन्ते स्म। वैदिकराजतन्त्रे राजपुत्र: प्रजानां सम्मतेरनुसारेण एव राजारूपेण वरणयोग्य: स्यादिति शतपथब्राह्मणमतम्। यदि राजपुत्रं प्रति प्रजावर्गाणामरुचि: स्यात् तर्हि राजन्येषु अभिज्ञं जनंप्रजानां सम्मतिक्रमेणैव शासनाधिकारे आरोह्यन्ति स्म।[४८] "राट् राजते"[४९]इत्यनेन निर्वचनेन "वस्त्रकल्पादिभि: स्वतेजसा वा देदीप्यमानं"[५०] व्यक्तिविशेषं राजेति

अभिहितम्। अर्थात् सः राजासम्पन्नशाली स्यादिति भावः। राजपदनिमित्तमावश्यकाः कतिचित् योग्यताः (qualifications) अत्र समुपस्थापिताः।

१. वैदिककाले शक्तिशालीनं बाहुवलिनं युद्धादिषु पारंगतं व्यक्तिविशेषं राजत्वेन वरणं क्रियते स्म।[५१]

२. प्रजाभ्यः सुख-शान्ति-समृद्धि-प्रदानक्षमपुरुषविशेषः एव राजा स्यादिति वैदिकनीतिः।[५२]

३. प्रजावत्सलः जनः एव राजा भवितुं शक्नोति।[५३]

४. सांगठनिककार्ये सामूहिककार्ये च अंशग्रहणं राज्ञः वैशिष्ट्यम्। तत्कालीनराजनीतेविकसिते समितिनामधेयसंस्थाविशेषे तस्य (राज्ञः) अंशग्रहणमतीव आवश्यकमासीत्।[५४]

५. इतोऽपि धर्मात्मने सुहृदाय परोपकारिणे सत्चरित्रवते दण्डज्ञपुरुषविशेषाय[५५] शासनभारः प्रदीयते स्म।

**वैदिकराजतन्त्रं खलु लोकतन्त्रात्मकम्**

"राजा एव राजसूयम्। राजा वै राजसूयेनेष्ट्वा भवति"।[५६]इति शतपथब्राह्मणस्य वचनमनुसृत्य राजसूयनामधेयस्य अनुष्ठानकर्तृपुरुषविशेषाणां'राजा'इति संज्ञा दीयते। परन्तु तद्यागानुष्ठानार्थं प्रजानां सम्मतेरावश्यकता परिदृश्यते।[५७] वस्तुतः राजसूययागे रत्नहविर्नामक-इष्टियागस्यैकंविधानमस्ति। तदिष्टियागे केचन रत्निन्-संज्ञकाः पुरुषविशेषाः हविः प्रदानार्थं आहूयन्ते। रत्निनस्तु राजकृतःवर्तन्ते। रत्नहविसंज्ञकेनहविष्-प्रदानेन ते राजानं परिचिन्वन्ति। तैत्तिरीयसंहितायामेकादशसंख्यकानांरत्निनांसूची संप्राप्यते[५८] तदेव अथर्वसंहितायां रथकार-कर्मकार-सूतग्रामण्यादीनामुल्लेखः[५९] राज्ञः निर्वाचकरूपेण राजकृत्-रुपेण वास्ति। धर्ममर्मज्ञैः रत्निभिरपि उत्कृष्टमुन्नततमं पुरुषविशेषं चित्वा तद्राजसूययज्ञंसञ्चालयितुं प्रेरयन्ति स्म।

अस्य राजसूययज्ञानुष्ठितस्य पुरुषविशेषस्य राज्याभिषेकमाध्यमेन नियुक्तिर्भवति।

राज्याभिषेकस्तु याज्ञिकसमारोह:। अस्याभिषेकस्य माध्यमेन निर्वाचितपुरुषविशेषाय संवैधानिकाधिकार: प्रदीयते। तत्समारोहे समागतानां सर्वेषां जनानां नैवाभिषेक: तत्तु राज्ञ: निमित्तमेवेति।[५९] वस्तुत: राज्याभिषेकानुष्ठाने सप्तदशसंख्यकानां पवित्रस्थानानां जलं संगृह्य[६०] तज्जलेन अभिषेक: प्रदीयते। अभिषेकादनन्तरं सर्वेषां प्रजावर्गाणामिच्छानुसारेण निर्वाचितो जन: राजा इत्योद्घोष्यते।[६१]

इहोल्लेखनीयं यत् वैदिकानां भूपतीनां नियुक्तिस्तु सानुबन्धंवर्तते।[६२] राजा धर्मानुचारी[६३] प्रजापालक:,[६४] दाण्डिक:[६५] परोपकारी च[६६] भवेत्। जनानामभिप्रायानुकूलकार्याणां परिचालनेन राजेति उपाधि: प्राप्यते अन्यथा स: 'अपरुद्ध' 'निरुद्ध'इति संज्ञया आख्यायत इति रामानुजताताचार्यस्य कथनम्।[६७] तदृशस्यअपरुद्धस्य पुरुषविशेषस्य शासनाधिकारात् निवृतेर्वर्णनं संहितासुबहुवारं दृश्यते।[६८]

एकस्यापरुद्धस्य पदच्युतस्य वा राज्ञ: पुन: प्रतिष्ठापनस्य वर्णनमपि संहितासु उपलब्धम्। अथर्वसंहिताया: तृतीयकाण्डस्य तृतीयचतुर्थसूक्तयोरस्य पुन: संस्थापनस्य वर्णनमुपलभ्यते। तत्र सौत्रामणि[६९]इति यागानुष्ठानेन पुन: संस्थापनं विहितम्। सौत्रामणियागस्तु प्रायश्चित्तवत् वर्तते। अस्य यागानुष्ठानेन अप्रसन्ना: प्रजा: प्रतिद्वन्दिशक्तिश्च तं (अपरुद्धं राजविशेषं) अभिनन्दयन्ति स्म।[७०]

## लोकतन्त्रम्

सम्प्रति विश्ववासिनां सर्वत: प्रियशासनपद्धतित्वेन ख्यातिलब्धो विद्यते लोकतन्त्र: गणतन्त्रो वा। एतस्य जनप्रियताया: कारणं तस्य वैशिष्ट्यमेव, यत्र शासनक्षेत्रे नीतिप्रणयनक्षेत्रे वा प्रजानां इच्छाकांक्षयो: प्रतिफलनं दृश्यते। अस्माकं भारतस्य प्रचीनवाङ्मयस्य अवलोकनात् ज्ञायते यत् प्रचीनराजनीते: यत् राजशासनस्य व्यवस्थासीत् सा तु मूलत: जनतन्त्रसम्भवाहि। संहिताग्रन्थे उपलब्धमानराज्ञ: निर्वाचनं,[७१] पुनश्च कुत्रचित् प्रजानां समर्थनपूर्वकं तस्य चयनवर्णनेन[७२]

जनतन्त्रस्यावस्थिति: प्रमाणीयते।

"अग्रणीर्भवतीति अग्नि:"[७३] इत्युक्त्वा यास्काचार्येण अग्रे तिष्ठमान:, अन्येषां (सर्वसाधारणानां) प्रतिनिधिकर्ता अग्निरित्युक्त:। स: प्रतिनिधि: धनदातृरूपेण[७४] हविवाहकरूपेण च[७५] वर्ण्यते। स: प्रतिनिधि: सर्वासां प्रजानां पालनार्थं[७६] विकासार्थं वा चिन्तयति यथा वर्तमानस्य निर्वाचितप्रतिनिधि: स्वानुचरान् संरक्षति। स: कुशल-संगठक:,जननायक: सेनाध्यक्षश्च[७७] विद्यते। अत: प्रजा अपि तं सखा-बन्धुत्वेन वा सम्बोधयन्ति।[७८]प्रजानुरन्जनार्थं स: शासनकर्ता भवति। स: राजा खाद्यवस्त्रादिभि: प्रजानां संरक्षणं प्रददाति।[७९] पुनश्च कुत्रचित् तेषां प्रजावर्गोपरि समदर्शिता[८०] कष्टनिवारणक्षेत्रे जागरूकता च[८१] परिदृश्यते।

वैदिकलोकतन्त्रस्योद्भवविषये तैत्तिरीयब्राह्मणे[८२] आख्यानमेकं श्रूयते यत् प्रजापतिना स्वस्य तपोवलेन प्रजानां सृजनमकरोत्। नवसृष्टप्रजावर्गोऽपि एकत्रितोभूत्वा स्वस्य इन्द्रनिमित्तं (शासकनिमित्तम् वा) प्रार्थयन्ते स्म। तदा प्रजापतिना स्वस्य तपोवलेन सृष्टान् प्रजाजनानुद्दिश्य स्वविवेचनानुसारं इन्द्रपदधारिणं शासकं निर्वाचयितुमादिदेश। अनेनानुमीयते यत्प्रजानां स्वस्य नेताचयनस्याधिकार: अस्मिन् उपाख्याने वर्णितोऽस्ति। इतोऽपि "त्वं विशो वृणतां राज्याय" इत्यथर्ववेदमन्त्रांशेन विश: जनानां वा राज्यपरिचालनार्थं राज-निर्वाचनस्य प्रमाणं ढृढीकरोति। वैदिक लोकतान्त्रिकव्यवस्थाया: अवस्थिते: प्रमाणस्वरुपविन्दव: अधोपस्थाप्यन्ते -

१. **क्षत्रमूलकं विश:**

२. **संसद्व्यवस्थाया: वर्णनम्।**

३. **क्षमताया: विकेन्द्रीकरणम्।**

**१.क्षत्रमूलकं विश:**

क्षत्रत्वमूलकमेव राजत्त्वम्। क्षत्र इति पदं क्षमतासूचकम्। आङ्लभाषाया: अयं power शब्दोऽपि लेटिन्-भाषाया: ‘posse’इत्यत: निर्गतोऽस्ति। अस्य पदस्यार्थ: समर्थ: (to be able) इति वर्तते।[८३] अत: क्षत्रत्वेन तेषां प्रभावशालीविषयाणां बोधोभवति, येनतादृशो जन: समग्रा: प्रजा:परिचालयन्ति। वस्तुत: अन्यपुरूषाणामुपरि तेषां कार्याणामुपरि वा स्वप्रभाव-नियन्त्रणप्रदर्शनमेव क्षत्रस्य क्षत्रत्वमिति। अस्य क्षत्रत्वस्योत्पत्तिविषये वैदिकसंहितायां प्राप्यते यत् जनेषु समुदायव्यवस्थाया: संरक्षणार्थं जनसमाजं च सुष्ठुरूपेण परिचालनार्थमस्य क्षत्रत्वस्य प्रतिष्ठा अभवदिति। अस्य क्षत्रस्य संरक्षणार्थं ओजबलयो: परिकल्पनं प्रत्यक्षीक्रियते। प्राप्यते च-

"भद्रं पश्यन्त उपसेदुरग्रे। तपो दीक्षामृषय: सुवर्विद:। तत: क्षत्रं बलमोजश्च जातम्। तदस्मै देवा अभिसन्नमन्तु"[८४] इति। यजुर्वेदेऽपि ब्रह्मक्षत्रबलयो: यशोगानं वर्णितम्।[८५]क्षात्रशक्ति: तदा एव दृढी भवितुमर्हति यदा सा ब्रह्मशक्त्या संयोज्यते। अत: शासनकार्ये शास्त्रज्ञानां सुपरामर्शस्यावश्यकता समागता। यत्कृते राजनीते: शिक्षा आवश्यकीयाङ्गत्वेन प्रदर्शिता वेदादिषु।

कालिदासेनरघुवंशमहाकाव्ये क्षतिकारक-विषयात् त्रायते इति अर्थे क्षत्रपदं प्रयुक्तम्।[८६] वैदिकसाहित्येषु विशंप्रति (जनगणं प्रति वा) शिक्षाप्रदानक्षेत्रे विशेषसतर्कता परिदृश्यते। "आ यद् वामीयचक्षसा"[८७] प्रभृतिमन्त्रे ‘इयचक्षसा’ इतिपदेन दूरदृष्टिसम्पन्नानांशिक्षितानांज्ञानिजनानाञ्च उल्लेख: कृतो येषां साहाय्येन स्वराज्यस्य निर्माणं भवतीति विश्वास:।[८८]

जना: क्षत्रत्वस्य राजशक्तेर्वा आधारस्वरूपा:। यतोहि वैदिकप्रशासनव्यवस्थायां जनसाधारणेन समर्थित: योग्य: पुरूष: एव शासनाधिष्ठितो भवेत्। लोकतन्त्रात्मिका

वैदिकव्यवस्था तदानीं सुव्यवस्थिता सुपरिकल्पिता चासीत्। शासकवर्गाणां चयनात्पूर्वं तेषां योग्यायोग्यत्वस्य परीक्षणार्थं विविधनियमा: सुची:वैदिकर्षिभि: प्रस्तुतीकृता। यतोहि निर्वाचितो जन: प्रतिनिधि भवति, अत: तस्योपरिविशालंकर्तव्यभारं भवति।स: च सर्वदा प्रजाकल्याणार्थंकार्यरतो भवेत्। तत्कारणवशात् जनप्रतिनिधेरावश्यकीयानां गुणानां विषये श्रुतिषु निगदितम् - "इन्द्र: सुत्रामा स्ववां अवोभि: सुमृडीको भवतु विश्ववेदा:"[८९]इति। इह सायणभाष्यदिशा[९०] प्रतिनिधे: गुणानि मन्त्रार्थानुसारमुपस्थाप्यते -

क. इन्द्र: - 'इन् द्र'इति निर्वचनेन शत्रून् भयप्रदर्शने सक्षम: पुरूषविशेष: इत्यर्थ: प्रकटित:।

ख. सुत्रामा - 'सु त्रामा' अर्थात् प्रजानांउत्तम: संरक्षक: इति भाव:।

ग. स्ववाम् - स्व-शक्त्या: कार्यपरिचालनार्थं समर्थ: पुरुष: इत्यर्थ:।

घ. अवोभि: - संरक्षणशक्तेर्युक्त इति भाव:।

ङ. सुमृडीक: - उत्कृष्टरूपेण उत्तमरीत्या: वाप्रजासु सुखशान्ति-प्रदानकर्ता इति।

च. विश्ववेदा: - सर्वज्ञानी चेति[९१]भावो प्रकाश्यते।

वैदिकशासनपद्धते: वंशानुक्रमिकराजतन्त्रस्यावस्थिति: न प्राप्यते इति समालोचकानां मतम्। अपितु पूर्वोक्तेन गुणेन परिपूर्ण: पुरूष: प्रजानां समर्थनपूर्वकं निर्वाचितोभवति स्म। शास्त्रप्रमाणमस्ति यत्'देवापि'इति कश्चित् अग्रजं विहाय अनुजं शान्तनुमभिषेचयाञ्चक्रे अयोग्यहीनत्वादिति।[९२] अत: गुणविशिष्टो योग्यो हि राजपदार्ह आसीत्तदानीम्। ऋक्संहितायाम् अथर्वसंहितायाञ्च नृपतेर्वरणविषये[९३]बहुतथ्यमुपलभ्यते।

**२.संसदीयव्यवस्था**

वैदिकलोकतान्त्रिकप्रशासने संसदीयव्यवस्थाया: सूक्ष्म: प्रकाश: परिलक्ष्यते। "अस्या:

सर्वस्या: संसदो मामिन्द्र भगिनं कृणु"[९४]इत्यनेन मन्त्रांशेन सभा, समितिश्चेतिनामकं संस्थाद्वयंसंसदेतिपदेनोल्लेखितम् । संसदि अमात्यादीनामतिशिष्टव्यवहारं आवश्यकमासीत्।[९५] अस्या संसद: सभासमिति इति संस्थाद्वयोर्वर्णनं राजपुत्रीरूपेण प्राप्यते – "प्रजापतेर्दुहितरौ संविदाने"[९६]इति। अत्र "संविदाने" इति पदेन सभासमितिसंज्ञकयो: संस्थाद्वयो: स्वातन्त्र्यसत्ता स्थितेऽपि उभयोर्मध्ये स्थिताया: परमोपयोगिताया: वर्णनं संप्राप्यते।[९७] सभा संज्ञक: संस्थाविशेष: उच्चशिक्षितजनानां समूह: असित्। तस्य कार्यक्षेत्रमपि सीमितं वर्तते। न केवलं राजनैतिकतत्वानां चिन्तनमपितु न्यायिकाधिकारप्रदानस्यापि प्रातिष्ठानरूपेण परिगणितासीत् वैदिकसभा इति संस्था। अत: संहितासु "सभा" इति पदं सूचयितुं बहुवारं वहुवचनस्यप्रयोग: कृत:।[९८] समितिनामधेयसंगठनस्तु केन्द्रसूतरीयो भवति। समिति इति संस्थाविशेषे राज्ञ: भागग्रहणं परममावश्यकमित्युच्यते।[९९] जनहितकरं प्रशंसनीयं कार्यं प्रति सम्मानप्रदानस्य व्यवस्थापि तत्कालिनसंसदि प्रवर्तते स्म।[१००]

वैदिकसंसदीयशासनप्रणाल्यां निर्वाचितप्रतिनिधि: निर्वाचनकर्ता: राजपुरोहितश्च संसदीयव्यवस्थाया: स्तम्भस्वरूपा:। तत्कालीनराजनीते: निर्वाचितप्रतिनिधिं राज्ञपदेनाभिधीयते। यास्काचार्यस्य "राजा राजते:"[१०१] इति निरुक्त्या: "दीप्यते ह्यसावष्टानां लोकपालनां वपुषा" इति दुर्गभाष्येणलोककल्याणसाधकपुरूषविशेषं राजा इति उक्तम्। राज्ञ: समानार्थकत्वेन 'नाथ'[१०२]'नृपति:'[१०३]इत्यादिशब्दा: प्रयुज्यन्ते। स: राजा शासनकार्यसौकर्यार्थं मन्त्रिणां नियोगं करोति। संहितासु 'अमात्य'इति पदं नृपतेर्मित्रत्वेन उपलब्धम्।[१०४] परवर्तिनि साहित्ये अस्य अमात्यस्य समानार्थकं पदं 'मन्त्री'इति प्राप्यते। य: मन्त्रणां ददाति स एव मन्त्री स्यात्। शासनकार्ये राजानं प्रति मन्त्रणाप्रदातृणामुल्लेख: संहितासूपलभ्यते - "ज्येष्ठश्च मन्त्र:"[१०५]"मन्त्रो गुरु"[१०६]"समानो मन्त्र:"[१०७]इत्यादय:।

संसद: प्रतिनिधय: जनकल्याणार्थं तत्परा: परिदृश्यन्ते। राजापि कृषि-पशुपालनार्थिकदीक्षोन्नतिभ्य:तत्पर: क्षेम: अर्थात् सर्वविधकल्याणार्थं च तत्पर: परिदृश्यते।[१०८]

यजुर्वेदस्यैव "बहुकार श्रेयस्कर भूयस्कर:"[१०९] प्रभृति मन्त्रांश: राज्ञ: कर्तव्यपालनं सूचयति यत् स: जनकल्याणकामी कार्ये संलग्नो भवेदिति।

## ३. क्षमताया: विकेन्द्रीकरणम्

वैदिकलोकतन्त्रे प्रारम्भिकसमये जनसंख्याया: न्यूनत्वात् एकेन शासकेनैव साक्षात् शासनभार-परिचालनस्योद्धृति: परिदृश्यते।[११०] परन्तु परवर्तिनि काले जनसंख्याया: वृद्धिभूते सति शासनकार्यं सुष्ठुरूपेण परिचालयितुं स्थानीयप्रशासनस्योत्पत्तिं कल्पयन्ति वैदिकर्षय:। एकस्य राष्ट्रस्य भौगोलिकदृष्ट्या अनेकेषु भागेषु विभज्य तेषु तेषु स्थानविशेषेषु एकैकस्य पुरुषस्य नियुक्तेर्वर्णनं संहितासु वर्णितम्। एकस्य शासकविशेषस्य राजनैतिकक्षमतां (शासन विषयक:) वा अनेकेषु शासकजनेषु कृतं विभाजनमेव क्षमताया: विकेन्द्रीकरणम्। इयं विकेन्द्रीकरणव्यवस्था तु तत्कालीनलोकतन्त्रे द्विधाविभक्तम्- १.विभागानुसारेण २.स्थानानुसारेण च।

१. विभागानुसारिणी विकेन्द्रीकरणव्यवस्था

संहिताप्रतिपादितराजनीतौ शासकस्य प्रशासनिकाधिकारो विविधै: विभागै: विभक्त: परिदृश्यते। प्रशासनव्यवस्थाया: सौकर्यार्थमेतेषां विभागानां सृजनम्। यथा सैन्यविभाग:, दण्डविभाग:, वित्तविभाग:, स्वास्थ्यविभागश्च। एतेषां विभागानामवस्थिति: न केवलं केन्द्रियप्रशासने एव अपितु विविध-राज्यिक-स्थानीयप्रशासनेऽपि परिलक्ष्यते। प्रत्येकेषु विभागेषु विशिष्टपुरूषाणां नियोजनेन शासनकार्यस्य सुष्ठु परिचालनमिति नीति:।

क. सैन्यविभाग: -संहितासु प्रतिफलितप्रशासनकार्ये सैन्यविभागस्य विस्तृतवर्णनं समुपलभ्यते। कुत्रचिद्राजा सेनाध्यक्षं नियुज्य सैन्यविभागं सुष्ठुरूपेण परिचालयति स्म।[१११] सेनाध्यक्ष: सेनानीति पदेनाभिहित:।[११२] कोषग्रन्थेऽपि सेनाध्यक्षनिमित्तं सेनानी पदमेवोपलब्धम्।[११३]ब्राह्मणग्रन्थे सेनानीं सूचयितुं सेनापतिपदमुपलब्धम्।[११४] किन्तु अन्यत्र

कुत्रचित् जनप्रतिनिधिरेव सेनानीरूपेणोपस्थाप्यते।[११५] अत: राज्ञि सेनाध्यक्षस्य अधिकारप्रदानव्यवस्था राज्याभिषेकसमये क्रियमाणेषु कर्मकाण्डीयनियमेषु अन्तर्भूकृता दृश्यते।[११६] जनप्रतिनिधिना सेनाध्यक्षस्य नियोजनं तु यत्र तत्र समुपलभ्यतैव किन्तु कदाचित् उपयुक्तव्यक्तेरभावात् स्वयं स: जनप्रतिनिधि: सेनाध्यक्षस्य भारग्रहणस्य वृत्तन्तमपि श्रूयते। जनप्रतिनिधे: सेनाध्यक्षत्वेन वरणविषये ऐतरेयब्राह्मणे आख्यानमेकं श्रूयते यत्र अत्यराति: सत्यहवस्य पुत्राय राज्यभारम् प्रदाय उत्तरकुरुप्रदेशं प्रति युद्धाय प्रतस्थे।[११७] ऋक्संहितायां सेनानीति पदस्य राजकृत् रूपेणोल्लेखो नैव समुपलब्धम्। परन्तु तैत्तिरीय[११८]-मैत्रायणी[११९]-काठकसंहितासु[१२०] च राजकृतेषु सेनानीति पदस्योल्लेख: पञ्चमे स्थाने प्रवर्तते। तैत्तिरीयब्राह्मणे[१२१] सप्तमेशतपथे[१२२]चप्रथमे स्थाने परिलक्ष्यते। अत: ऋक्संहितायां निर्वाचितप्रतिनिधिरेव सेनानी इत्यस्य भारं गृह्णाति परन्तु समयस्योपयोगितां परिलक्ष्य स: शासनकर्ताअन्यव्यक्तिविशेषं सेनानीपदे नियोजयति तथा च विविधराजनैतिकपरिस्थितिं परिलक्ष्य तस्य नामांकनस्य वैविध्यतास्माभिर्दृश्यते।

ख. दण्डविभाग: -वैदिकप्रशासनव्यवस्थायां दण्डविभागस्यावश्यकता परिलक्ष्यत एव। अस्य दण्डस्यावश्यकतां वीक्ष्यराजनीतेरन्यनाम: दण्डनीतिरितिस्थिरीकृतमिति प्रतिभाति। मनुरपि दण्डव्यवस्थया प्रजासु संरक्षण-संवर्धन-जागरूकता-सद्धर्माचरणञ्च स्थापनार्थमुपदिशति।[१२३] निरूक्तकार: “दण्ड्य: पुरूष” इति वाक्यांशेन अपराधिव्यक्तिविशेषं यो दण्डार्ह तं सूचयति। आचार्य: औपमन्यवोऽपि “दण्ड-दमनात्” इति वाक्यांशेन दण्ड्यपुरूषविशेषस्य दमनार्थे दण्डपदं व्याख्यायति।[१२४] दण्डाभावे प्रजानां शान्तिरसंभवो भवति अत: प्रजा: शत्रुत: संरक्षयितुं दण्डस्य प्रयोजनम्। न केवलं बाह्यिकात् आपद: जनगणानां संरक्षणमपितु आभ्यन्तरेभ्य: विवादादिभ्य: परित्राणं व्यवस्थेयं विहितास्ति। संहितासु स्तेन[१२५]-तस्कर[१२६]-मलिम्लुच्प्रभृतिपदानामुल्लेख:[१२७]प्राप्यते। वस्तुत: इमे शब्दा: चौर-दुराचारिपुरूषविशेष-

बोधका:, समाजव्यवस्थाया: घातकरूपाश्च वर्तन्ते। तेषां प्रत्येकेषां स्वस्य स्वस्य अपराधपरिमितं दण्डप्रदानार्थं संहितासुबहूनि नीति-नियमानि समुपलभ्यन्ते। यातुधानं मायावी पुरूषं[१२८] वा तीक्ष्णायुधप्रहारस्योपदेश: प्राप्यते[१२९]। स्तेन-तस्करादि चौरकार्यप्रवृतानां कृते शिरश्छेद: उतो राज्यात् बहिष्कारएव विहित:।[१३०] संहिताप्रतिपादितेषु दण्डसम्बन्धिवाक्येषु हननमिति पदं न केवलं मृत्युदण्डनिमित्तं तत्तु दोषपरिमितस्य दण्डप्रदानार्थमपि प्रयुक्तमिति।

ग. अर्थविभाग:-शासनकार्यम् अर्थविभागस्योपरि अधिकतया निर्भरशीलं परिलक्ष्यते। अर्थनैतिकोन्नतेर्विना प्रशासनकार्ये स्थिरता नैवोपलभ्यते। "राजा प्रकृतिरञ्जनात्" इत्युक्तिं सार्थकं कर्तुं प्रजावर्गाणां रञ्जनार्थमेवनृपति: जनकल्याणकारि-कार्ये-संलग्नो भवति। येन च स: संहितासु "भूयष्कर: श्रेयष्कर"[१३१] इत्यादिशब्दै: प्रशंसित:। अराजानो राजकृतेषु संग्रहीतासंज्ञकं रत्नीनं सायणेन कोषाध्यक्षमिति उक्तम्।[१३२]इह "अराजानो" इति पदेन "राजपरिजनभिन्नो जन" इत्यर्थो बोद्धव्य:।"हिन्दु पोलिटि" इति शीर्षके ग्रन्थे संगृहीता इति संज्ञकं रत्नीनं कोषाध्यक्षरूपेण, भागदुहं करविभागाध्यक्षरूपेण व्याख्यातम्।[१३३]परन्तु सायणेनतैत्तिरीयसंहिताया: भाष्यग्रन्थे भागदुह: करविभागस्य अधिकारीरूपेणैवोपस्थापित:।[१३४] परवर्तिसमये संग्रहीता समाहर्तारूपेण ख्यात:। प्रजाभ्य: करग्रहणं समाहर्तु:मुख्य: कर्तव्य:। संहितासु वर्णितेषु द्वादशसंख्यकेषु ब्रह्मण-राजन्य-महिषी-परिवृता-सेनानी-संग्रहिता-क्षता-सूत-ग्रामणी-भागदुघ- अक्षवाप-गोविकर्त-इत्येतेषु रत्निनेषु[१३५] भागदुह-समाहर्त्रौ नाम: अर्थविभागेन सह संयुक्तम्।

संहितासु वर्णितासु प्रशासनव्यवस्थासु सम्यक्-शासनं, प्रजानां सर्वतोमुखिकल्याणसाधनञ्च मुख्यरूपेण गण्येते। तत्कालिनराजनीते: उद्योग-स्वास्थ्य-परिवहन-प्रभृति विभागानां भूमिका: गौणरूपेण स्वीकृता इति प्रतिभाति, येनएतेषां विभागानां विभागाध्यक्षाणां रत्नीनां च नास्ति स्पष्टोल्लेख:।

२.स्थानानुसारिणी विकेन्द्रीकरणव्यवस्था

स्थानानुसारि-विकेन्द्रीकरणव्यवस्थायां भौगोलिकदृष्ट्या कृतस्य विभाजनस्योल्लेखं कर्तुं शक्यते। सूक्ष्मातिसूक्ष्मं जनसमूहं परिलक्ष्य एकैकस्य शासकस्य नियुक्तिरेव अस्य स्थानानुसारिणिविकेन्द्रीकरणस्य नीतिः। संहितासु जनसंख्यानुसारं विविधक्षेत्रेषु विविधानामधिकारिणां नियोजनेन प्रशासनस्य श्रृंखला समभिरक्षिता। तदनुसारं प्रत्येक व्यक्ति-गृह-ग्राम-नगर-सङ्घ-समित्यादयः प्रत्यक्षपरोक्ष्यरूपेण च शासनकार्ये संलग्नाः भवन्ति। अस्यां व्यवस्थायां गृहपति-कुलपति-व्रातपति-पुर्पति-ग्रामणी-विश्पति-स्थपति-दशपति-शपति-राष्ट्रपतिप्रभृति- जननायकस्यावस्थितिः परिलक्ष्यते। सर्वे जननायकाः जनसाधारणैः निर्वाचितभूते सति अपि राज्ञा केन्द्रीय शासकेन वा तेषां नियुक्तिर्विहिता। स्थानानुसारिणि-विकेन्द्रीकरणव्यवस्था अनेकासु भागोपविभागासु विभाजिता। परन्तु मुख्यरूपेण तासां मुख्यविभाजनं त्रिधा परिलक्ष्यते -

क. ग्राम्यप्रशासनम्।

ख. प्रान्तीयप्रशासनम।

ग. केन्द्रीयप्रशासनम्।

## ग्राम्यप्रशासनम्

विशालपरिसरसम्पन्नजनपदत्वात् एकेनैव शासकेन सुष्ठुतया शासितुं नैव शक्यते। शासनसौकर्यार्थं शासकस्य निर्देशानुसारं ग्रामे जनपदे वा प्रजाः परस्परमालोच्य ग्रामप्रमुखान् निर्वाचयन्ति स्म। ग्रामप्रमुखाणां सहयोगिनोऽपि भवन्ति स्म। ते च प्रशासनस्याङ्गस्वरूपा आसन्। वस्तुतः एवं प्रकारेणशासकः नायको वा सुशासनपरिचालनार्थं तस्य क्षमतायाः विकेन्द्रीकरणं करोति स्म। तत्र वैदिकप्रशासनस्य सूक्ष्मतरो विभागः आसीत् ग्रामः। तद्युगे

नगराणां संख्या ग्रामात् न्यूनतरा आसीत्।[१३६] अत: तात्कालिकस्थानीयप्रशासनविश्लेषणावसरे ग्राम्यप्रशासनमवश्यं विश्लेषणीयम्।

### वैदिकग्राम्यव्यवस्थाया: उद्भव: विकासश्च

वैदिकसमाजव्यवस्थायां ग्राम इत्यस्यउद्भव: कदा जातइति विषये किञ्चित् चिन्तनीयमस्ति। परिवारव्यवस्थाया: विकाशात् समानान्तररूपेण ग्रामस्यापि उत्पत्ति: कल्पितास्ति। वैदिकजना: बाह्यिकशत्रुभ्य: हिंसकप्राणिभ्य:[१३७] प्राकृतिक-आपद्भ्यो वा स्वस्यपरित्राणार्थमेकत्रितवासं कुर्वन्ति स्म। पारस्परिकसहयोगमाध्यमेन ते जीवननिर्वाहं कुर्वन्ति स्म।"सखे निधिर्हित:"[१३८]इति वैदिकमन्त्रांशस्य दृष्टान्तेन एतदेव वक्तुं शक्यते यत् वैदिकसमाजव्यवस्थायां पारस्परिकसहयोगं विपदिरुग्णावस्थायां वा साहाय्यस्य भावना परिदृश्यते। वैदिकपरिवारा: कश्मिश्चित् निर्दिष्टस्थाने एकीभूय: अरण्यात् वृक्षशाखावंशादिसंगृह्य[१३९] तेषां सम्यक् परियोजनेन दृढबन्धनेन[१४०] च गृहनिर्माणं कुर्वन्ति स्म इति वर्णनं[१४१] प्राप्यते। प्रत्येकपरिवार: स्व-स्व-गृहनिर्माणं कृत्वा गतानुगतिकजीवनयापनं चालयन्ति स्म। एतेषां परिवाराणां अन्यमेकमभिधानमासीत् गोत्रं गोष्ठी वा। गोत्रशब्दस्य शाब्दिकोऽर्थ: "गौ संरक्षणस्थानमिति"[१४२]अस्ति। वस्तुत: वैदिकसमाजे गौ: धनस्य प्रतीक:[१४३] आसीत्। वैदिकर्षय प्रभुसकाशं एतत् स्तुवन्त: दृश्यन्ते यत्प्रजा: गो-अश्वादिधनं प्रयच्छतु इति।[१४४] अत: वैदिकसमाजे गो-पालनं, गोसंवर्धनं, गोसंरक्षणविषये च विशेषमहत्वं परिलक्ष्यते। एकस्य गोत्रस्य प्रमुखव्यक्तिं 'गोत्रपति'इति कथ्यते स्म। एकस्य गोत्रपत्याधीने गो-चरणार्थं यद् स्थानमासीत् तद् गोष्ठम् इति। अस्माद् गोष्ठशब्दादेव गोष्ठी इति पदस्योद्भव: कल्पित:। गोष्ठस्य पर्यायवाचि अन्यदेकं पदमासीत् व्राज:।[१४५] एकस्य गोष्ठस्य नृपति: गोष्ठपति: व्राजपतिर्वा इत्युच्यते। कतिचित्संख्यकानां गोष्ठीव्राजादीनां समूहो ग्राम इति संज्ञित:। एवमेव वैदिकसमाजे व्यक्तिपरिवारादारभ्य: ग्राम्यव्यवस्थाया: उद्भव: जात:।

ग्रामस्य सामाजिक-राजनैतिक-सांस्कृतिक-अर्थनैतिक-शैक्षिकाद्युन्नत्यै:ग्रामवासिजना: सदैव तत्परा: परिलक्ष्यन्ते स्म। सर्वे ग्रामवासिन: मिलित्वा विशिष्टं जनंतेषां नायकत्वेन वरणं कुर्वन्ति स्म, स: व्यक्तिविशेष एव 'ग्रामणी'[१४६] इति कथ्यते स्म। वैदिकसंहितादिषु अस्य "ग्रामणी" इति पदस्य व्यवहारो दरीदृश्यते।[१४७]"ग्रामं नयतीति ग्रामणी" अनेन निर्वचनेन भाष्यकारेण उवटेन ग्राममुन्नतेर्मार्गं प्रति नयमानं व्यक्तिविशेषं ग्रामणीति संज्ञया समुदाहृतम्।[१४८] स ग्रामणी सामूहिकव्यवस्थया पञ्चायतव्यवस्थया वा स्वशासनं परिचालयति स्म इति कल्पितुं शक्यते।

**पञ्चायतशब्दस्यार्थान्वेषणम्**

वैदिकराजनीते: स्थानीयप्रशासनं पञ्चायत इति शब्देन सम्बोधनं तु नैवोपलभ्यते किन्तु पञ्चायदिति शब्दस्योत्पत्तिविषये विविधानि तथ्यानि संहितादिषु उपलभ्यन्ते। 'पाञ्चजन्य'[१४९]-'पंचदेवी'[१५०]-'पंचजन'[२५१]–प्रभृतिशब्दानां पुनरावृत्ति: दृश्यते। किन्तु तत्र पंचेतिपद: विविधार्थबोधक:।

Vedic Index इति ग्रन्थे पंचजन: इत्यस्यार्थ: पञ्चसंख्यकानां जातीनां समाहार: इति उक्तम्।[१५२] किन्तु इत्यत्र निश्चितं नास्ति यत् का: का: ता: पञ्चसंख्यका: जातय:। ऋग्वेदे पंचजातिषु अनु-द्रह्यु-यदु-तुर्वशु-पुरु[१५३]-प्रभृतानामुल्लेख: प्राप्यते। सायणेन तस्य भाष्ये देव-मनुष्य-गान्धर्व-अप्सरादीनां पञ्चत्वेनोद्घोषितम्।[१५४]निरूक्तग्रन्थे औपमन्यवस्य मतमपि एतदेव।[१५५]कुत्रचित्पुन: तेन पंचनदीनामुपकूले स्थिता: आर्यजना: इति निर्देशिता:।[१५६] ऋग्वेदे १.११७.३,१.५३.१६ तथा ८.६३.७ संख्यकेमन्त्रे उपलब्धस्य पाञ्चजन्यशब्दस्यार्थत्वेन ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-निषादादीनां ग्रहणं कृतम्[१५७]। किन्तु यास्केन गान्धर्व-पितर-देवता-असुर-राक्षसादीनां ग्रहणेन पञ्चजना: परिगणिता।[१५८]

एवमेव विविधार्थकपञ्चपदेन वस्तुत: ग्रामस्थजनानां (नागरिकाणां)

वैविध्यतायापरिचयो दीयते। विविधजातिवर्गयोर्वा जनानां सामूहिकसहवासो ग्रामे भवति अत: ग्राम्यशासने तेषां सर्वेषामेव भूमिका भवेदिति परिकल्पनापूर्वकं पञ्चजनात्मिकाया: ग्रामसभाया: विकास:कृत: वैदिक-विद्वद्भि:। एवं रीत्या पञ्चजाति-पञ्चवर्गबोधकात्पञ्चपदादेव ‘पञ्चायत’इति शब्दस्योत्पत्ति: परिकल्पिता।

**पञ्चायतप्रशासनस्यस्वरूपम्**

ग्रामस्य शासननायक: ‘ग्रामणी’ग्रामसभया एव तस्य शासनादिकं कार्यं परिचालयति स्म। कौटिल्यस्य ‘ग्रामसंघ’इति पदं वैदिकि ग्रामसभाया एवद्योतकम्। ग्रामसभाया: अधिवेशने प्रत्येकपरिवाराणां (कुलानां वा) कुलपतय: अंशग्रहणं कुर्वन्ति स्म। पाणिनिना कुलपतीनां कृते ‘गोत्रपति’[१५९] इति पदं तथा परिवाराणामन्यजनानां कृते ‘युवापत्य’[१६०] इति पदं च व्यवहृतम्।

वैदिकग्रामादिषु प्रत्येकेषां परिवाराणां स्वस्य-कुलदेवताया: पूजनोपासनस्य विधानमासीत्[१६१] तथापि सामूहिकरूपेण ते सर्वे परिवारा: एकस्या एव ग्राम्यदेवताया: पूजनमर्चनं वन्दनञ्च कुर्वन्ति स्म। आर्थिकदृष्ट्यामपि प्रत्येकेषां परिवाराणां स्वसम्पत्तौ (गौ-सुवर्ण-अश्वादिकं धनम्) स्थितायामपि भूम्यादिसम्पद: न कस्यापि स्वस्याधीनासीत्।[१६२]ग्रामस्थस्वल्पसंख्यकानां निर्धनानां वा साहाय्यार्थं धनसंग्रहस्य व्यवस्थापि ग्रामसभया परिकल्पितासीत्।[१६३]ग्रामसभा ग्रामत: करग्रहणंकर्तुं शक्नोति स्म।[१६४] अत: करप्रदातृभ्य: संरक्षणस्योत्तरदायित्वं[१६५] तेषां ग्रामवृद्धजनानामुपर्येव न्यस्तमासीत्। ते ग्रामस्योन्नतिनिमित्तं प्रस्तावितानां सार्वजनिकयोजनादीनां कार्यान्वयनार्थं मुख्यशासकत: राज्ञसकाशाद्वा धनग्रहणस्य व्यवस्थापि प्राचीनस्थानीयप्रशासने अवलोक्यते।[१६६]

**ग्रामणी इत्यस्य योग्यायोग्यत्वस्य विवरणम्**

"अयोग्य: पुरुषो नास्ति" इति कथनानुसारं संसारेऽस्मिन् अयोग्यताया: स्वीकार्यता वार्यते तथैव राजनैतिकक्षेत्रेऽपि कमपि कार्यभारप्रदानात्पूर्वं तस्य योग्यायोग्यत्वस्य विचारमवश्यमेव करणीयं

वर्तते। एकस्य ग्रामस्य मुख्यव्यक्तित्वेन ग्रामशासनविषये स एव सर्वेसर्वा विद्यते। ग्रामीणानां सामग्रिकोन्नतेर्निमित्तं, विविधविपद्भ्य:संरक्षणनिमित्तं दण्डविधानादि-नीतिप्रणयनक्षेत्रे च‘ग्रामणी’एकनायक: इवासीत्। अत: तस्य योग्यताया: परिक्षणमपि नितान्तं स्यात्। वैदिकर्षिभि: ‘ग्रामणी’इत्यस्य ग्रामनेतुर्वा अर्हताविषये निगदितानि सूक्तमन्त्राणि विश्लेष्यन्तेऽत्र -

१. "ग्रामजितो यथा नर"[१६७] य: नर: (पुरुषो वा) ग्रामवासिनां जयं कर्तुं समर्थोभवतीति।

२. "दक्षिणावान् ग्रामणी"[१६८] य: पुरुषविशेष: दक्षिण्यगुणयुक्त अस्ति अर्थात् धनवान् दानशीलश्च अस्ति स एव ग्रामणीनिमित्तं सुयोग्य: स्यात्। पुनश्च समृद्धिशाली तेजोमयश्च भवेत्स:।[१६९]

३. "अग्रमेति"[१७०] सदैव अग्रे तिष्ठति इति भाव:। ग्रामणीपदनिमित्तं तस्य नेतृत्वप्रदानस्य शक्ति: स्यादिति।

४. "ग्रामस्य गणकम्"[१७१] गणक: अर्थात् ज्योतिर्विद:।[१७२] यथा ज्योतिषी ग्रहनक्षत्रादीनामवस्थानस्याध्ययनपूर्वकं भविष्यं वक्तुं शक्नोति तथैव ग्रामणीरपि सम्यक् परीक्षणपूर्वकं भविष्योपयोगि नीतिनिर्धारणक्षमो भवेत्।

५. "सेनानीग्रामण्यौ"[१७३]इत्यनेन मन्त्रांशेन सेनापतिसहितं ग्रामणी इत्यस्य नामोच्चारणेन सामरिकक्षेत्रे तयो: समकक्षता प्रदर्श्यते। अत: ग्रामणीपदस्य कृते तस्य सामरिकज्ञानं शस्त्रप्रयोगस्य ज्ञानं वा स्यादिति।

६. "त्रयो वै गताश्रिय: शुश्रुवान् ग्रामणी राजन्य"[१७४]इत्यनेन श्रुतिमन्त्रेण वेदज्ञराज्ञोर्मध्ये ग्रामणीमपि संस्थापनेन तस्य गौरवताया: समृद्धिशीलतायाश्च भाव: व्यक्तीक्रियते। अत: ग्रामणी इति पदे नियुक्त्यर्थं स: वेदज्ञ: राजवत् सर्वज्ञ: सद्धर्मचारी च भवेदिति।

**ग्रामणीइत्यस्य नियुक्तिः**

वैदिकप्रशासने ग्रामणी इति पदस्य विशेषमहत्वं परिलक्ष्यते। "ग्रामणी" राज्ञा निर्वाचितः आसीद्वा जनसाधारणेन निर्वाचितः आसीत् तस्य पुष्टप्रमाणं नैवोपलभ्यते। कुत्रचित् जनानां ग्रामवासिनां मतदानपूर्वकं तेषामधिकारप्रदानस्य वर्णनं श्रूयते।[१७५] यथा - "ग्रामजितो यथा नरः" अर्थात् ग्रामवासिनां हृदयजयकर्तुं सामर्थ्यवान् जनः ग्रामणी इत्युच्यते। सायणभाष्ये "संघात्मकस्य पदार्थस्य विश्लेषयितारः (ग्रामजितः) नरोनराकाराकारनेतारोवामरुतः यद्वा नियुत्वन्तः"[१७६]इत्यस्मात् ज्ञायते यत् सर्वेषां जनानां मध्ये समतापूर्वकं शासनं कर्तुं योग्यो व्यक्तिः ग्रामणी इत्युच्यते स्म। ग्रामणीपदस्य वंशानुक्रमिकव्यवस्थायाः वर्णनं संहितादिषु प्रत्यक्षरूपेण नैवोपलभ्यते किन्तु वध्र्यश्व-दिवोदास-पिजवन्-सुदास-पुरूकुत्स-त्रसद्दस्यु-मित्रातिथि-कुरूश्रवण- उपश्रवस्-प्रभृतानां वंशगतनृपतीनामुल्लेखपुरस्सरं डा. सूर्यकान्तेन वैदिकप्रशासने आनुवंशिकपरम्परायाः दृष्टान्तं समुद्धार्यते।[१७७] राज्ञा ग्रामणीइत्यस्य नियुक्तिरपि श्रूयते।[१७८] ग्रामवासिनः कुलपतयः व्राजपतयश्च मिलित्वा यं कमपि राजपरिजनं, सामन्तजनं, व्यक्तिविशेषं वा तेषामधिकारित्वेन वरणं कुर्वन्ति स एव तस्य ग्रामस्याधिपतिः भवति।

**ग्रामणी इत्यस्य विशेषाधिकारः**

वैदिकराजनीतेः स्थानीयप्रशासनस्य विशेषमहत्वं विद्यते स्म। ग्रामस्य प्रशासनव्यवस्था विशेषरूपेण व्यवस्थिताः सुपरिकल्पिताश्च आसन्। देशस्य राष्ट्रस्य वा शिक्षा-अर्थनीति-सामरिकशक्तेश्च ग्रामोपरि निर्भरशीला आसन्। ग्रामादेव अन्नोपार्जनं पशुधनस्य संरक्षणं संवर्धनं विविधशिक्षाप्रदानेन मानवसम्पदोन्नतिकरणञ्च सम्भवति।[१७९] ग्रामे सहवासंकुर्वाणां जनानां "ग्रामी" इति पदं वैदिकसंहितासु उपलब्धम्।[१८०]'ग्रामी' इति शब्दस्यार्थः श्रेष्ठःवरिष्ठो वा।[१८१] तत्समये ग्रामस्थजनान् श्रेष्ठं शिक्षितं सम्पन्नशालिनञ्च कर्तुं ग्राम्यशासने विविधपद्धतयः अपि प्रचलिताः आसन्। ग्रामात् करग्रहणेन[१८२] राष्ट्रस्य राजकोषस्य समृद्धिनिमित्तंस्वीकृता व्यवस्था

वैदिकप्रशासने परिलक्ष्यते।[१८३] ग्रामादेव सैन्यादीनां प्रशिक्षणस्य व्यवस्था विहितासीत्। तत्प्रशिक्षणं ग्रामणी-द्वारा एव सञ्चालितः परिचालितश्च भवति स्म। अतएकस्य राष्ट्रस्य सामरिकक्षेत्रे ग्राम्यप्रशासनस्य अभूतपूर्वा भूमिका परिदृश्यते। ग्रामणी  इत्यस्य विविधानां राजनैतिकार्थनैतिक-शैक्षिक-सामाजिक-सामरिकाधिकाराणां किञ्चित् विस्तारपूर्वकमालोचना प्रस्तूयते -

१. राजनैतिकाधिकारः ग्रामस्य शासनभारः सम्पूर्णरूपेण  ग्रामण्युपरि न्यस्तः आसीत्। ग्राम्यशासनविषये नीतिनिर्धारण-दण्डविधानप्रभृतिक्षेत्रे स एव प्रमुखत्वेन स्वीकृतः। तत्र मन्त्रादिषु क्वचित् "महसे" इति पदं ग्रामणी इत्यस्य गौरवार्थं प्रयुक्तम्।[१८४]इतोऽपि ग्रामणी इत्यस्य राज्ञः निर्वाचनसमये विशेषराजनीतिकाधिकारः आसीत्। सः समग्रग्रामस्य प्रतिनिधिरूपेण स्वमतदानंकर्तुं शक्नोति स्म। अराजानो राजकृतेषु[१८५] अर्थात् राजपरिवारात् वहिस्स्थितेषु राजनिर्वाचकेषु रत्निषु[१८६]तस्य विशिष्टस्थानमासीत्।

२. अर्थनैतिकाधिकारः वैदिकग्रामण्यः अर्थनैतिकदृष्ट्या समृद्धिशालिनः आसन्। कृषि-अन्न-पशुपालन-[१८७]उद्योग-शिल्पकलाप्रभृतिविषये ग्रामस्थजनाः सम्पन्ना आसन्। एतेषां सर्वेषां धनसम्पदादीनां निरिक्षणाधिकारी ग्रामणी एव आसीत्। "ग्रामण्यगणकम्" इति शुक्लयजुर्वेदीयमन्त्रेण गणकेनसह ग्रामणी इत्यस्यापि अभिनन्दनमुल्लेखितम्। डा. सूर्यकान्तेनगणकः पदस्यार्थः 'ज्योतिर्विद्'इति प्रोक्तम्। तत्र केचन "गणनां करोति यः सः गणकः" इति निर्वचनेन कोषस्य आयव्ययस्य निरीक्षकव्यक्तिविशेषं गणकमिति वक्तुमिच्छन्ति।[१८८] अस्य आयव्ययस्य गणनाकर्त्रा सह 'ग्रामणी'इत्यस्य वर्णनेन राष्ट्रस्यार्थनैतिकाधिकारे तस्य भूमिकां प्रदर्शयते। यतोहि ग्रामणी धनवान् समृद्धिशालीव्यक्तिर्विद्यते अतः सः ग्रामस्थ महत्वाकांक्षिजनानां अर्थनैतिकोन्नतेर्निमित्तम् ऋणप्रदानं[१८९] कर्तुं शक्नोति। अस्य ऋणप्रदानस्याधिकारे राजाराजाधिकारी वा कोऽपि जनः हस्तक्षेपं कर्तुं असमर्थःआसीदिति सूचितम्।[१९०] सः ग्रामस्य

मानवसम्पद्पशुसम्पदोरून्नतिनिमित्तं सततं प्रयत्नरतो दृश्यते। यस्य साहाय्येन राज्य-राष्ट्र-विश्वस्य चोन्नति: कल्पिता।[१९१]

३. संरक्षणस्याधिकार:ग्रामणी वैदिकग्रामस्य शक्तिसम्पन्नत्वात् विशिष्टाधिकारित्वाच्च ग्रामवासिनां सुरक्षाप्रदानं तस्य प्रमुख: कर्तव्यो विद्यते। स: विद्वेषकारी-राक्षसादिकं[१९२]नाशयित्वा[१९३] स्वस्य नायकत्वस्य भूमिकां प्रकटयति।तस्य विशेषरथे आरूह्य[१९४]शत्रुविनाशस्यवर्णनं शुक्लयजुस्संहितायामुपलभ्यते।

४. सामरिकाधिकार:ग्रामणी यद्यपि ग्रामनेता तदपि तस्य राष्ट्रस्य सामग्रिक-सामरिकव्यवस्थायां काचित् विशिष्टभूमिका परिदृश्यते। ऋग्वेदस्य एकस्मिन्मन्त्रे[१९५] इन्द्रं साहाय्यं कर्तुं तस्य युद्धे अवतरणस्य वर्णनं प्राप्यते। अत्र जनसाधारण इत्यनेन राष्ट्रस्था: जना: विशेषत: शस्त्रप्रयोगे परिपक्वानां 'ग्रामणी'इत्यादीनामेव बोधो जायते। ग्रामणी तस्य भारग्रहणसमये संकल्पवद्धो भवति यत् स: आजीवनं सैनिककार्ये तत्परो भविष्यतीति।[१९६] स श्रुतिप्रतिपादितेषु महासैन्येषु[१९७]'श्रुतसेन'[१९८]इत्याख्येप्रसिद्धसैन्यविभागे, येशस्त्रप्रयोगे कुशला: विद्यन्ते[१९९]तेषु ग्रामणी अपि विद्यते। अत: अन्येषां साधारणग्रामवासिनां तुलनायां ग्रामणी इत्यस्य सामरिकाधिकार: कश्चित् विशिष्टोविद्यते।

५. दण्डविधानस्याधिकार:वैदिकसमाजे प्राथमिकपर्यायस्य दण्डविधानस्याधिकारो ग्रामण्युपर्यैव न्यस्तमासीत्।[२००] ग्रामे चौर-व्यभिचारी-समाजशोषकान् समाजव्यवस्थायां विघ्नकर्तॄन् च तेषां दोषानुरूपं दण्डप्रदानस्य व्यवस्था वैदिकप्रशासने परिदृश्यते। चौरनिमित्तं शिरच्छेद:[२०१], शोषकानां निमित्तं निर्वलीकरणं[२०२] व्यभिचारिणां कृते शस्त्रप्रहारस्य[२०३] च वर्णनं संहितासु उपलब्धम्।

बृहदारण्यकोपनिषदि "उग्रा: प्रत्येनस: सूतग्रामण्य:"[२०४] इति मन्त्रांशेन सुतग्रामण्यो: उग्रताया: वर्णनं समुपस्थाप्यते। 'प्रत्येनस:' इतिपदस्यार्थं"पापिनं पापिनं प्रति शासनार्थं नियुक्ता:

क्रुरकर्माणश्च"[२०५]बोद्धव्य:। अर्थात् पापिनां दण्डप्रदानार्थं नृपतिना नियोजित: दण्डाधिकारी इत्यर्थ:।

## प्रान्तीयप्रशासनम्

वैदिकसंहितासु प्रान्तविषयकसामग्र्यन्वेषणकार्ये यद्यपि वर्तमानपद्धत्यनुसारेण पृथक् पृथक् परिभाषाणां उत्पत्तेरूपादानानां तत्वानां वा सुस्पष्टं वर्णनं नैवोपलभ्यते तथापि तेषां सूत्ररूपनिदर्शनं त्ववश्यमेव यत्र तत्र विकीर्णमुपलभ्यते। अत: संहितासु प्रान्तीयप्रशासनस्य बहूनि तथ्यानि समुपलभ्यन्ते इति कथनेन अत्युक्तिर्न भवति। वस्तुत: मानवानां सङ्गठितसमुदायो वर्तते राज्यं, य एकस्यैव शासनस्याधीने तिष्ठति।[२०६]किन्तु वैदिकोत्तरशास्त्रेषु "सप्ताङ्गं राज्यमुच्यते" इति श्लोकांशेन सप्तसंख्यकानां अङ्कानां समाहारं राज्यमिति उक्तम्।[२०७]"शं राज्यं रोदस्यो"[२०८]"सोम्यं वै राज्यम्। सा एवास्मै राज्यं प्रयच्छति[२०९]"इत्यादिमन्त्रांशे राज्यिकप्रशासनस्यावस्थिति: प्रान्तियप्रशासनस्यावस्थितिर्वाज्ञायते।

संहितासु राज्यिकप्रशासनस्य मूलभूततत्त्वरूपेण किमपि प्रामाणिकतथ्यं नैवोपलभ्यते। किन्तु वैदिकराजनैतिकशास्त्रस्य अध्येतार: चतुसंख्यकानां तत्त्वानां समाहारो राज्यमिति वक्तुमिच्छन्ति- १.ब्रह्म २.क्षत्र ३.विश ४.राष्ट्रश्च।[२१०] संहितामन्त्रेषु ब्रह्मक्षत्रयो: विशराष्ट्रयोश्च पृथक् पृथक् उल्लेखोपरिलक्षिते। यत्र ब्रह्म तु उन्नायक: मार्गदर्शक: आचारशिक्षकश्च वर्तते। अत: राज्यिकप्रशासने अस्य ब्रह्मशक्ते: ब्रह्मबलस्य वा परमोपयोगिता परिलक्ष्यते। क्षत्रस्य भूमिका व्यावहारिकपक्षे आयाति। ब्रह्मण: परिकल्पनं क्षत्रद्वारा कार्यान्वितं भवति। अत: संहितायामपि ब्रह्मक्षत्रयो: समन्वितकार्यसम्पादनेन कश्चिदपि एक: भूप्रदेश: पुण्यलोके परिवर्तनस्योद्धृतिं समुपलभ्यते,[२११]तादृशो भूप्रदेश: श्रियै:धनसम्पद्भिश्च सम्पन्नो भवतीत्यपि वर्णनं प्राप्यते।[२१२] प्रशासनिकविषये विविधानां समस्यानां समाधाननिमित्तं प्रजावर्गाणां

संरक्षण-संवर्धन-परिपालन-कष्टनिवारण-सर्वाङ्गिगनोन्नतेर्निमित्तं च ब्रह्मक्षत्रयो: समन्वयपूर्वकेन कार्यकरणस्य निदर्शनमपि तत्र प्राप्यते।

ब्रह्मक्षत्रयोरनन्तरं प्राप्यते विशराष्ट्रयोर्वर्णनम्। शुक्लयजुस्संहितायां विशराष्ट्रयो: अङ्गाङ्गिगनोसम्बन्ध: दृश्यते।[२१३] अन्यैकस्मिन् मन्त्रे एकस्मिन् भूप्रदेशान्तर्गतेस्थिता: जना: विश् इति संज्ञया सम्बोधिता:।[२१४]बृहदारण्यकोपनिषदि[२१५] अपि ब्रह्मक्षत्रयोरनन्तरं विशराष्ट्रयोरूत्पत्ति: वर्णिता। वस्तुत: विश् इति जनसाधारणसूचक: राष्ट्रपदेन च कञ्चिदपि एको भूप्रदेश द्योतते। "मम द्विता राष्ट्रम्"[२१६] प्रभृतिमन्त्रे 'विश्वायोर्विश्वं' इति पदं 'राष्ट्रप्रजाश्चेत्यर्थे'[२१७] प्रयुक्तम्।

**प्रान्तीयप्रशासनस्य स्वरूपम्**

प्रान्तियप्रशासनिककार्ये राज्याधिपति: एव प्रमुखोविद्यते। स: राजा अनेकेषां व्यक्तिविशेषाणां नियोजनेन तस्य प्रशासनिककार्यं सम्पादयति। राज्ञ: राज्याभिषेकसमये तस्य मुख्यकर्तव्यमुद्दिश्य गीयमानो वैदिकमन्त्र: प्राप्यते- "कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा" इति।[२१८] अर्थात् कृषिकार्यसम्पादनार्थं, प्रजाभ्य: क्षेमप्रदानार्थं धनसम्पदां वृद्ध्यर्थं भरणपोषणार्थञ्च राज्ञ: नियुक्तिर्भवतीतिवर्णितमस्ति।

वस्तुत: समाजव्यवस्थायां विशेष: प्रभावशाली, शत्रुसंहारक्षम:प्रजाहितैषी जनएव राजा इति पदवाच्य:। अत: राजाभवितुं स: विशेषो जन:पराक्रमी, प्रजावत्सल: कर्तव्यपरायणश्च भवेत्। वैदिकसाहित्ये राज्ञ: वरणार्थं द्वौ सिद्धान्तौ प्रचलितौ स्त- पैतृकसिद्धान्त: चयनसिद्धान्तश्च।

१. पैतृकसिद्धान्त: -पैतृकसिद्धान्ते कोऽपि राजास्वपुत्रं योग्यपुरूषरूपेण राजारूपेण च वरणंकरोति। संहिताग्रन्थेषु राजपुत्र-युवराजप्रभृतिपदानामुल्लेख: परिलक्ष्यते।[२१९] राज्ञो भ्रातापि राजकार्ये प्रशासनकार्ये वा राज्ञ: साहाय्यप्रदानं स्वकर्तव्यरूपेणैवकरोति इति

वर्णीतमस्ति।[२२०] इतोऽपि महिषि-वावातयो:च विशेषराजनैतिकाधिकारं परिलक्षते।[२२१] राजपदस्य स्थिरतामानेतुं प्रयोजिता: नैका: मन्त्रा: स्तुतिश्च संहितासु उपलभ्यन्ते।[२२२] एतै: मन्त्रै: एतदेव प्रमाणीयते यत् वैदिकशासनपद्धत्यांपुरूषानुक्रमेण एकेन राजपरिवारेण शासनकार्यं परिचालितमासीत्।

२. चयनसिद्धान्त: -वैदिकराजनीतेशासकचयनव्यवस्थावर्णनेन तत्कालीनजनसाधारणानां राजनैतिकजागरुकतां प्रमाणयति। राजपदमवाप्तुं राजसूययज्ञसम्पादनं परमावश्यकम्। उक्तं च शतपथे- "राजा एव राजसूयम्। राजा वै राजसूयेनेष्ट्वा भवति न वै ब्राह्मणो राज्यायाऽलमवरं वै राजसूयं परं वाजपेयम्" इति।[२२३] अस्य राजसूययज्ञस्य वर्णनावसरे राष्ट्रभृत् होमश्च वर्ण्यते। राष्ट्रभृत् इतिपदेन राष्ट्रधारकव्यक्तिविशेषं बुध्यते। तत्र राजाराजन्यश्च राष्ट्रभृत्-रूपेण वर्णितोऽस्ति।[२२४]विविधक्षेत्रस्य विविधवर्गस्य च प्रतिनिधय: एव राष्ट्रभृत: रत्निनो वा भवन्ति।

**राज्याधिपते: योग्यताया: विवरणम्**

शासकपुरूषविशेष: प्रकाशार्थक: राट्-धातौ प्रजानुरञ्जनार्थक: कानिन्प्रत्ययसंयोगेन राजा इति पदं सिद्ध्यति। अत: राज्याध्यक्षस्यनिमित्तं प्रजापालनाय अपरिहार्या: सर्वे गुणा: आवश्यका: वर्तन्ते। पाणिनिना ऐश्वर्यसम्पन्नपुरूषविशेषं राजापदेनाभिहितम्।[२२५] छान्दोग्योपनिषदि श्रेष्ठ-ज्येष्ठपुरूषविशेषं राज्याधिपतिरूपेण वरणस्योद्धरणं वर्णितम्।[२२६] संहिताब्राह्मणारण्यक-ग्रन्थेषु च प्रतिपादितेषु विविधप्रकारकाणां राज्यिकप्रशासनानां कृते राज्याधिपतेरपि विविधयोग्यता आवश्यकीया इति प्रोक्तम्। राज्याधिपतेर्निमित्तं राजसूययज्ञसम्पादनं परमावश्यकम्।[२२७] साम्राज्याधिपतेर्निमित्तं वाजपेययज्ञसम्पादनीय:।[२२८] तथैव महाराज्यस्याधिपतेर्निमित्तं प्रवलशत्रूविजयी भवितव्य:।[२२९] किन्तु ब्राह्मणेषु राजसूयवाजपेययज्ञयो: पौर्व्यापौर्व्यत्वं परिलक्ष्यते। गोपथे यज्ञक्रमविश्लेषणावसरे राजसूयानन्तरं वाजपेयस्यानुष्ठानं वर्णितम्।[२३०] किन्तु

आश्वालायनश्रौतसूत्रे[२३१] वाजपेयानन्तरं राजसूयस्यानुष्ठानं वर्णितम्। सम्भवत: राजनैतिकपरिस्थिते: परिवर्तनात् राज्यसाम्राज्यादिनां नीतिव्यवहारेषु वैविध्यता समागता इति प्रतिभाति।

**प्रान्तीयाधिपतेर्नियुक्ति:**

प्रान्तीयाधिपते: राज्ञो नियुक्ति: राज्याभिषेकमाध्यमेन अनुष्ठीयते। राज्याभिषेकसमारोहे राजपुरोहित:, प्रतिवेशिनां राज्यानामधिपतय:, राजकृत:रत्निनश्चएकत्रीभूय विविधकर्मकाण्डीयानुष्ठानेन राज्याभिषेकं कारयति। वस्तुत: राजानं राज्यस्यविविधवर्गस्य प्रतिनिधय: रत्निन: प्रतिवेशिराजनश्चराजसिंहासने आरोहयन्ति। तदनन्तरं स: भूपति इति नाम्ना ख्यातिं लभते।

**प्रान्तीयाधिपतेर्विविधाधिकार:**

वैदिकराजनीतौ प्रान्तीयप्रशासनं विशेषभूमिकामावहति। वैदिकराज्यव्यवस्थया प्रशासनिककार्यं सुपरिकल्पितरूपेण व्यवस्थितरूपेण च परिचाल्यते स्म। कस्यापि राष्ट्रस्य अर्थनीति-शिक्षा-सामरिकशक्ति-मानवसम्पदोन्नतिश्च विशेषतया प्रान्तीयप्रशासनस्योपरि निर्भरशीला: परिलक्ष्यन्ते। वैदिकद्रष्टिभि:केन्द्रीय-ग्राम्यप्रशासनयो: कार्यं सुष्ठुपरिचालनार्थं प्रान्तीयशासनरूपस्य संयोगसूत्रस्यावश्यकता अनुभूता। अत: ग्राम्यप्रशासनं परिचालयितुं ग्रामणीषु ऐक्यस्थापनार्थं प्रान्तीयप्रशासनव्यवस्था प्रवर्तिता:। अस्य प्रान्तीयाधिपते: विविधाधिकार: इह आलोच्यते-

१. राजनैतिकाधिकार:एकस्य प्रान्तस्य शासनभार: सम्पूर्णरूपेण प्रान्ताधिपतेरधीने न्यस्तमासीत्। प्रान्तीयप्रशासने नीतिनिर्धारणं तथा तेषां प्रणयनक्षेत्रे च प्रान्ताधिपते: गुरूत्वं परिलक्ष्यते। प्रान्तीयाधिपतेर्प्रतापं वर्णयन् स असुरसंहारकत्वेन श्रुतिषु वर्णित:।[२३२]तेन कठीनानुशासनं पालयितव्यम्।[२३३]वैदिकादर्शानुसारं तेन दुष्टान् दण्डप्रदानेन सज्जनान्

मृदुव्यवहारेण शासनभारं चालयितव्यम्। तेनैव ग्राम्यप्रशासनस्य निरीक्षणं सम्पाद्यते। ग्रामणीनां नियुक्तिरपि प्रान्ताधिपतेरधीनम्।

२. अर्थनैतिकाधिकार:- "विशम् अत्ताऽजनि"[२३४]इत्यनेन ब्राह्मणवाक्येन प्रजासकाशात् करग्रहणस्य नीति सूचिता। प्रान्ताधिपतिना स्थानीयप्रशासकै: संग्रहितं करं एकत्रीकृत्य तस्य किञ्चिदंशं केन्द्रीयशासकनिमित्तं प्रेषयित्वा अवशिष्टांशेन राजकोषं पूर्यते।[२३५] परवर्तिसमये शासनकार्ये प्रजानां विकासकार्ये च तस्य राजकोषस्थस्य धनस्य उपयोगस्याधिकारमपि प्रान्त्याधिपतेरेवासीत्। स एव तस्य धनस्य यथायोग्यवितरणं कारयति।[२३६] राज्यस्य भौगोलिकसीमान्तर्गतानां सर्वेषां ग्रामाणां सर्वाङ्गीणोन्नतेर्निमित्तं आवश्यकीयं धनं प्रान्त्याधिपति एव विनियोगं करोति। अत: वैदिकप्रशासने अर्थनैतिकदृष्ट्या सर्वाधिकगुरूत्वपूर्णभारं प्रान्त्याधिपतेरेव परिलक्ष्यते।

३. सामरिकाधिकार:प्रान्ताधिपते: सामरिकाधिकारमपि परिलक्ष्यते। स: राजारूपेण राज्यस्य आन्तरिकं प्रशासनं चालयति पुनश्च स्वयमेव सेनानीरूपेणापिबाह्यिकशत्रुत: राज्य-प्रजयो: सुरक्षां विदधाति। वस्तुत: सेनानी इति पदं सेनाध्यक्षसूचकम्।[२३७] ब्राह्मणेष्वपि जननायकं सेनापतिरूपेणोपस्थापितं श्रुतिषु - "पृथिव्यै राजाऽस्य: सेनापति" इति।[२३८]शतपथब्राह्मणे रत्नीषु सर्वप्रथमं स्थानं सेनानीनिमित्तं प्रदत्तमस्ति।

४. शैक्षिकाधिकार:-शैक्षिकोन्नतिं विना जनसाधारणानां प्रगतिर्नैव संभवति।अत: वैदिकराजनीतौ प्रान्तीयाधिपतिरपि स्वस्य प्रान्तवासीनामुन्नतेर्निमित्तं ज्ञानविज्ञानस्योत्कर्ष[२३९] साधयति। तस्याभिषेकसमये "सरस्वत्यै त्वा अभिषिञ्चामि"[२४०] - प्रभृति मन्त्रांशेन ज्ञानस्य प्रचार-प्रसारार्थं ज्ञानिजनानां संरक्षणार्थं [२४१] च तस्य वरणं वर्णितम्। अत: एकस्य प्रान्तस्यान्तर्गतजनेषु ज्ञानस्य प्रकाशवितरणं[२४२] प्रान्ताधिपतिना एव संभवतीति वक्तुं शक्यते।

## केन्द्रीयप्रशासनम्

वैदिकप्रशासनव्यवस्थायां स्थानीयशासनवत् प्रान्तीयशासनवच्च केन्द्रीयप्रशासनस्यापि विशेषमहत्त्वं परिलक्ष्यते। विशेषत: स्थानीयाशासका: प्रान्तीयशासकाञ्च परस्परमैक्यसंस्थापयितुं केन्द्रीयप्रशासनस्यावश्यकता अनुभूत। स्थानीय-प्रान्तीयशासकयोर्मध्ये सञ्जात-वादविवादादीनां सुष्ठुसमाधानार्थं तयोरूर्ध्वतनसंस्थाया: आविर्भावो जात:, या च केन्द्रियप्रशासनव्यवस्थारूपेण परिचिता। अस्या: व्यवस्थाया: प्रमुखलक्ष्यरूपेण प्रमुखलक्षरूपेण प्रजानां धर्मसंस्कृतिरक्षणं सर्वजनहिताय नीतिप्रणयनं सर्वेषां मध्ये ऐक्यसंस्थापनप्रचेष्टा चेति स्थिरीकृता।[२४३]

किन्तु अस्य केन्द्रस्याधीने कियन्तं परिमितं भौगोलिकपरिसरं विद्यते तस्य सुस्पष्ट: निर्देश: नैवोपलभ्यते। अद्यापि राष्ट्राणां साम्राज्यादीनाञ्च विशाल: भौगोलिकपरिसर: तु परिलक्ष्यते एव। तत्र पूर्वपश्चिमोत्तरदक्षिणदिग्भि: समुद्रवेष्टितस्य भूभागस्य एकस्यैव नायकस्य वर्णनं संहितासूपलब्धम्।[२४४] स: 'एकराट्' इत्यनेन सम्बोध्यते। वैदिककेन्द्रीयप्रशासनव्यवस्था महाराज्यं साम्राज्यञ्चेति द्विधा विभक्ता। यत्र केषाञ्चन राज्यानां शासनप्रमुखा: सम्भूय राज्याणामुन्नतिनिमित्तं सुयोग्यपुरूषं तेषामधिपतित्वेन चित्वा प्रशासनव्यवस्थां संस्थापयन्ति सा महाराज्यीयव्यवस्था इति प्रोक्ता,[२४५] तद्वत् यदा कोऽपि सामर्थ्यवान् युद्धविग्रहादिना परपक्षं जित्वा स्वप्रभुत्वं तत्र स्थापयति तदा सा व्यवस्था साम्राज्यव्यवस्था इति निगदिता।[२४६]

**केन्द्रीयप्रशासनस्य स्वरूपम्-** महाराज्यव्यवस्था साम्राज्यव्यवस्था च केन्द्रियप्रशासनरूपेण परिगणिता। इत्यत्र उभयविधस्य किञ्चित् विस्तृतपूर्वकं विश्लेषणमुपस्थाप्यते -

क. महाराज्यम्- महत् चैतत् राज्यमिति महाराज्यम्। अस्य महाराज्येतिपदस्य निर्वचनस्य अर्थद्वयं भवति- परिमाणसूचक: गुणसूचकश्चेति।[२४७] महाराज्ये भौगोलिकपरिसर:[२४८] धनसम्पदादि ऐश्वर्यश्च[२४९] विशाल: परिलक्ष्यते। महाराज्याधिना: प्रान्तशासका: करप्रदानेन

तस्य वशं स्वीकुर्वन्ति अत: महाराजापि महत् ऐश्वर्यसम्पन्नरूपेण परिगणितो भवति।

महाराज्यप्रशासनव्यवस्थाया: नवीनरूपस्तु युक्तराष्ट्रियशासनव्यवस्थेति विद्यते। यत्र स्थानीयप्रशासक-केन्द्रीयप्रशासकयो: समाधिकारौ वर्तेते। एकस्य महाराज्यस्य जनगणा: यथा स्वस्य राज्यस्य नागरिका: भवन्ति तथैव सामूहिकरूपेण महाराज्यस्यापि नागरिका: स्यु:।[२५०] ते महाराज्यस्य नागरिकत्वात् युद्धविग्रहं ते कदपि न इच्छन्ति स्म।[२५१] युक्तराष्ट्रियशासनव्यवस्थायां राज्यराष्ट्रयो: उभयविधयो: पृथक् शासनव्यवस्था सत्यपिं एक: अन्यस्योपरि निर्भरशील: तथैव वैदिकमहाराज्यव्यवस्थायामपि राज्ञ: चयनावसरे विविधप्रशासनिककार्यसम्पादनावसरे युद्धावसरे च प्रान्तस्तरीयनृपतीनाम् आवश्यकता दृश्यते पुनश्च स्थानीय-प्रान्तीयप्रशासकयो: नियुक्तिसमये केन्द्रीयप्रशासकस्यावश्यकता परिलक्षिता। अत: महाराज्येति प्रशासनप्रकार: युक्तराष्ट्रियप्रशासनस्यैव प्राचीनरूपम् इति वक्तुं शक्यते।

ख. साम्राज्यम्- सम् उपसर्गपूर्वक: राज् धातौ ष्यञ् प्रत्ययसंयोगेन साम्राज्येतिपदं निष्पन्नम्। अत: साम्राज्यमित्यनेन “तद्राज्यं यत्र सर्वत्र सम्यक् राजते प्रकाशते च तस्य भावमिति बोद्धव्यम्।[२५२] साम्राज्यव्यवस्थाया: प्रशासनं सम्यक् रीत्या भवितव्यम्। तत् निमित्तं शासक: सम्राट् वा सुयोग्य: स्यात्। सम्राट्-रूपेण वरणार्थं कर्तव्यनिष्ठै:, सुकृद्भि: ऋतधर्मेणयुक्तैश्च भवितव्यम्।[२५३] स:सहनशील: प्रजावत्सलश्च भवेत्।[२५४] सिन्धुगंगावत् तस्य गभीरता ऐश्वर्यसम्पन्नश्च भवेदिति काम्यते।[२५५]

सम्राट् कस्यापि विस्तृतभूप्रदेशस्य एकछत्राधिपतिर्भवति। स: परमशक्तिशाली अपराजयी च स्यात्।[२५६] साम्राज्यव्यवस्थायां कदाचित् प्रान्तीयशासकानां स्वत्वहरणस्यापि प्रमाणं परिलक्ष्यते। तद्विपरीते तु याज्ञवल्क्यस्मृते:[२५७] स्थानीय-प्रान्तीयशासकयो: अनुसरणपूर्वकं साम्राज्यव्यवस्थाया: परिकल्पनं विहितम्। ऋक्संहितायामपि[२५८] साम्राज्यार्थं निर्वाचितं

सम्राट् प्रजानामधिकारहननस्य विरूद्ध आसीदिति भाव: स्फुटित:।

अस्य साम्राज्यस्य चरमोत्कर्षं संहितासु बहुत्र परिलक्ष्यते।। साम्राज्यव्यवस्थायां स्थानीयप्रशासननिमित्तं कञ्चित् राजसहायकं नियोजनस्य विधानमासीत्।[२५९] किन्तु तस्य अधिकारक्षेत्रं पूर्णरूपेण सम्राजोऽधीने आसीत्। अत: साम्राज्यव्यवस्था केन्द्रशासितस्य तन्त्रस्य वीजरूपा इति वक्तुं शक्यते।

**महाराज्यसाम्राज्यव्यवस्थयो: वैविध्यता**

उपर्युक्तानां विषयाणाम् अध्ययनादनन्तरमेतदेवगम्यते यत्- साम्राज्यमहाराज्ययोर्मध्ये भौगोलिकदृष्ट्या पृथग्रूपं यद्यपि न भवति तथापि सूक्ष्मनिरीक्षणेन एतयोर्वैविध्यं स्पष्टतया परिलक्ष्यते। तासां विविधतानां उल्लेखं क्रियतेत्र --

१. महाराज्यशासनव्यवस्थायां राज्याधिपति: महाराजा इत्यभिधीते। महाराजेति पदं प्राप्यर्थं राजसूययज्ञस्यानुष्ठानं सम्पादनीयम्। साम्राज्यव्यवस्थायां साम्राज्यस्याधिपति: सम्राट् इत्यनेन सम्बोध्यते। सम्राट्भवितुं वाजपेययज्ञस्य विधानं वर्ण्यते श्रुतिषु।

२. महाराज्यव्यवस्था वर्तमानस्य युक्तराष्ट्रियशासनव्यवस्थावत् वर्तते साम्राज्यव्यवस्था च केन्द्रशासिततन्त्रवदिति।

३. महाराज्यव्यवस्थायाम् आभ्यन्तरिणप्रशासकानां स्वाधीनता परिलक्ष्यते किन्तु साम्राज्यव्यवस्थायां तस्याभावो विद्यते।

४. महाराज्यव्यवस्थायां केन्द्रीयशासकेन आश्रितराज्यानां प्राशासनिकसमस्यासमाधानाय चेष्टते, किन्तु साम्राज्यव्यवस्थायां केवलं करग्रहणेन स्वस्याधिपत्यस्य स्थापनमेव परिलक्ष्यते।

५. ऐतरेयब्राह्मणस्य ८.५ पञ्चिकाया: "अग्निष्ट्वा गायत्र्या सयुक् छन्दसा आरोहतु" इति

ब्राह्मणवाक्यस्य व्याख्यायां सायण: "राज्यं देशाधिपत्यं, साम्राज्यं धर्मेण पालनं- भौज्यं भोग-समृद्धि..... एतदुक्तम् ऐहिकम्। अथाऽऽमुष्मिकम् उच्यते- पारमेष्ठ्यं प्रजापतिलोकप्राप्ति:। तत्र राज्यम् ऐश्वर्यं, महाराज्यं तत्रत्यैभ्य इतरेभ्य आधिक्यम्"। अनेन वाक्येन साम्राज्यमिहलौकिक शासनव्यवस्थात्वेन महाराज्यं पारलौकिकव्यवस्थात्वेन च व्याख्यातम्।

**केन्द्रियशासकस्य प्रशासननीति:**

वैदिकप्रशासने केन्द्रीयशासकस्यभूमिका स्थानीय-प्रान्तीयशासकाभ्यामधिकतरं परिलक्ष्यते। केन्द्रशासकेन स्वशौर्यवीर्यादिगुणै: राष्ट्ररक्षणार्थं प्रजारञ्जनार्थञ्च सर्वदा सचेष्टो भवितव्यमिति विधानमासीत्।[१६०] केन्द्रीयशासकस्य प्रशासननीति: विस्तारपूर्वकमत्रालोच्यते -

१. अधिकारीनियोगनीति: - अधिकारी इत्यनेन प्राप्ताधिकारो जन: ज्ञातव्य:। केन्द्रीयप्रशासक: तस्यशासनकार्यसौकार्यार्थं विविधाधिकाराणां नियोजनं करोति। तस्य वरणसमये आहुतिप्रदातॄनां रत्नीनां विविधाधिकारप्रदानेन शासनकार्ये नियोजयति। ग्रामण्य: नियुक्ते अपि केन्द्रस्यैवाधिकारं परिलक्ष्यते।[२६१] पुराध्यक्षस्य दुर्गाध्यक्षस्य नियुक्तिरपि केन्द्रशासकेनैव सम्पाद्यते।[२६२] संहिता-ब्राह्मणारण्यकादिषु केन्द्रियशासकस्य शासननीति: भूयश: चर्च्चिता।[२६३]इतोऽपि केन्द्रस्य प्रशासनं सुदृढीकर्तुं पुरोहितेन[२६४] सह अन्ये ज्ञानिनां मन्त्रिणामभिमतग्रहणस्योदाहरणं संहितासूपलब्धम्।[२६५]

२. करग्रहणस्यनीति: - केन्द्रीयप्रशासने समग्रकेन्द्रस्यार्थिकिस्थिति: करग्रहणस्य पद्धत्योपरि निर्भरशीला भवति। यतोहि करग्रहणमाध्यमेन संगृहीतधनै: राजकोष: पूर्यते। राजकोषस्थस्य धनस्य प्रयोगेनैव विकासोन्नतिमुलकानि कार्याणि, सैन्यव्यवस्था-शासनादिकार्याणि च परिचाल्यन्तो।[२६६] अत: तदानीं राजकोषस्योपयोगविषये विशेषसतर्कता ह्यवलम्बनीयासीत्। वैदिककरग्रहणनीतौ कियत् परिमितं धनं ग्रहणीयं

तद्विषये मतवैविध्यता परिलक्ष्यते। किन्तु अथर्वसंहिताया एकस्मिन् मन्त्रे आयस्य एक-षोडशांस: (१/१६) कररूपेण परिगणनस्योदाहरणं समुपलभ्यते।[२६७] इतोऽपि आभ्यन्तरीनराज्याधिपतय: करप्रदानेन महाराजस्य सम्राजो वा वशीभूतत्वं स्वीकुर्वन्ति।[२६८] युद्धादिषु पराजितनायकोऽपि करप्रदानेनैव एव स्वस्य पराजयत्वमङ्गीकरोति स्म।[२६९]

३. सैन्यसञ्चालनस्य नीति: - केन्द्रीयप्रशासने सैन्यव्यवस्थाया: विशेषमहत्वं परिलक्षते। अत: नीतिप्रणयनसमये सैन्यव्यवस्था विशिष्टेन विवेचितव्यासीत्। केन्द्रीयप्रशासने सेनाध्यक्षपदे विशिष्टगुणसम्पन्नो व्यक्तिविशेषो नियुज्यते।[२७०] कदाचित् सुयोग्यपुरूषाभावात् राजा स्वयमेव सेनानीपदे आरोहति स्म।[२७१]

जातिवर्णादि प्रभेदं विहाय एकस्य साम्राज्यस्यान्तर्गता: सुयोग्यजना: सैन्यवले नियुज्यन्ते स्म। केन्द्रीयसैन्यानां भरणपोषणं राजकोषस्थधनेनैव विधास्यते।[२७२] युद्धेषु वीरगतिं प्राप्तं प्रति विशेषमर्यादाप्रकटीक्रियते स्म। युद्धार्थं सैन्यानां मनोबलवर्धनस्य कार्यमपि केन्द्रीयप्रशासनस्यैव प्रमुखकर्तव्यमासीत्तदानीं यच्च अधुनापि परिलक्ष्यते।

एवमेव ‘वैदिकलोकतन्त्रम्’ इति शीर्षके द्वितीयेध्याये वैदिकयुगस्य लोकतान्त्रिकप्रशासनस्य सामग्रिकरूपस्योपस्थापनात्पूर्वं श्रूत्यादिषु ‘शासन’ पदस्यावस्थिति: तस्योद्भवस्य कारणान्वेषणपूर्वकं विकाशस्यधारानिर्णयञ्च सम्यग्रुपेण प्रतिपादितम्। श्रूत्यादिनामध्ययनेन राजनैतिकपक्षस्य विचारविमर्शं परिलक्ष्य राजतन्त्रस्यावस्थिते: प्रतिति तु जायते एव किन्तु वास्तवक्षेत्रे तत्राजतन्त्रमपि लोकतन्त्रात्मकमैवासीत्।जननायकं ‘राजा’ इति पदेन संज्ञते चेदपि तस्य निर्वाचनमाध्यमेन जनसमर्थनपूर्वकमभिषेकञ्च विधानीतमासीत्। जनसमर्थनपूर्वकात् शासनाधिष्ठितो पुरूषविशेष: अपि लोकहितार्थं विविधानां नीतिनां प्रणयनेन विकाशमुलककार्ये संलग्नो परिलक्ष्यते।

**उपसंहार:**

'राजनीतिशास्त्रम्' विकशितसमाजव्यवस्थाया: एकमपरिहार्यमङ्गम्। मानवसमाजं संघटित-विकशित-संरक्षितरूपेण स्थापयितुं राजशासनस्यावश्यकतानुभूता। वैदिकसमाजेऽपि पूर्वोक्तप्रयोजनानां पूरणार्थमेव राजनीतेर्प्रवर्तनम्। किन्तु कालक्रमेण राजशास्त्रे राजतन्त्र-लोकतन्त्रादि-नैकविधानां शासनानां सृजनं जातम्। इयं लोकतन्त्रनाम्न: शासनपद्धति: अद्यावधिविकशितेषु शासनपद्धतीषु सर्वाधिकजनसमर्थनप्राप्ता पद्धतिर्विद्यते।

संस्कृतसाहित्येषु वर्णितस्य राजनीतिशास्त्रस्याध्ययनेन लोकतान्त्रिकव्यवस्थाया: अवस्थिति: लोकतान्त्रिकावधारणानाञ्च प्रतिफलनं प्रत्यक्षीक्रियते। काव्यग्रन्थेष्वपि रघु-अशोकादीनां बहुनृपतिनां दिग्विजययात्रया युद्धपद्धत्या वा स्वस्य स्वस्य साम्राज्यप्रतिष्ठाया: वर्णनं परिलक्ष्य तेषु साम्राज्येषु वंशानुक्रमिकशासनविधिं च परिलक्ष्य तत्कालिनराजनीत्यां राजतन्त्रस्यावस्थिति: प्रमाणिता। किन्तु वास्तवक्षेत्रे तद्राजतन्त्रेऽपि लोकतान्त्रिकभावधाराया: एवावस्थानमासीत्। यतोहि निर्वाचनव्यवस्थाया: विकाशेन, क्षमताया: विकेन्द्रिकरणेन, शिक्षा-स्वास्थ्य-मताभिव्यक्ति-उपासना-स्वातन्त्र्यादि विविधाधिकाराणां प्रदानेन च तत्कालिनराजनीतौ लोकतन्त्रस्य भित्ति: सुदृढा आसीदिति परिलक्ष्यते।

वैदिकलोकतान्त्रिकप्रशासने ग्रामशासनव्यवस्थाया: विकाशात् ग्रामपर्यायत: शासनं विकेन्द्रीकर्तुंप्रयाशो विहित:। तद्वदाधुनिकलोकतन्त्रेपि स्थानीयप्रशासनस्य (पञ्चायत-पौरसभादीनां वा) भूमिका अस्माभि: गोचरीक्रियते। प्रान्तीयपर्यायस्य केन्द्रियपर्यायस्य च शासकचयनावसरे 'ग्रामणी' इत्यस्य या विशेषराजनैतिकक्षमता परिलक्ष्यते तद्वत् आधुनिकलोकतन्त्रेपि विधायकानां सांसदानाञ्च इत्यादीनां निर्वाचनसमये स्थानीयराजनैतिकमतालम्बीनां भूमिका गुरुत्वपूर्णा भवति। जनमतसंघटने राजनैतिकाभिमतानां प्रचारकार्ये च तेषामावश्यकता सर्वैरेव स्वीक्रियते।

‘स्वाधीनता’ एवं ‘समता’ लोकतन्त्रस्याधारस्वरूपा। वैदिकलोकतान्त्रिकप्रशासने एषां स्तम्भरूपादर्शानामवस्थितिः दरीदृश्यते। जनसाधारणैः स्वशासनार्थं निजानुरूपविधिप्रवर्तनं, प्रयोजनानुसारं संशोधनं तदनुपालनेन समाजविकाशप्रचेष्टा हि ‘स्वाधीनता’ ‘स्वनियन्त्रणं’ वा। किन्तु वर्तमानकालिन-लोकतान्त्रिकप्रशासने जनसाधारणैः निर्वाचिताः जनप्रतिनिधयः पूर्णरूपेण जनकल्याणसाधने रताः न दृश्यन्ते। ऐक्यतायाः अभावात् जनाः अपि तान्निरस्त्रीकर्तुं न शक्नुवन्ति। येन जनप्रतिनिधिभिः निरंकुशतया स्वाधिकारहननं क्रियते। परन्तु वैदिकजनाः सुसंघटिताः आसन्। तेषां पार्श्वे तात्कालिकशासकानां स्वैराचारतन्त्रं प्रतिहतकर्तुं अधिकारः आसीत्। अतः आधुनिकव्यवस्थायाः तुलनायां तात्कालिकं वैदिकलोकतन्त्रं जनसाधारणानां कृते फलदायकमासीदिति वक्तुं शक्यते।

इतोपि एकस्य राष्ट्रस्य निवासीनः राजनैतिकदृष्ट्या समानत्वेन विवेचितव्याः, इत्येव ‘समता’ ‘साम्यता’ वा। एतादृश्याः समतायाः अवधारणा वैदिकलोकतन्त्रे केवलं राजनैतिकक्षेत्रे एव आबद्धो नासीत् अपि तु विचार-सिद्धान्त-आदर्श-लक्ष्यादिषु च तदानीं समानता परिलक्ष्यते। यस्मात् कारणात् तत्कालीनलोकतन्त्रमधिकं परिशुद्धं परिमार्जितञ्च इति प्रतिभाति।